Paramartha Series' Volume III.

'तस्मै सर्वात्मने नमः

# अधिकरणरत्नमाला

## परमार्थदर्शनीया

## सवार्तिका

रामावतारशर्मणा प्रणीता प्रकाशिता च ।

काश्याम्

महामण्डलशास्त्रप्रकाशकयन्त्रे

श्रीपम्बिकाचरणचक्रवर्ती द्वारा मुद्रिता ।

सन् १९१३ ई०

मूल्यम् १)

# शुद्धिपत्रम् ।

| | | | | | |
|---|---|---|---|---|---|
| गुरुम् | | चगुरुम् | | ७० | ७० |
| मानम | ... | मनम् | ... | ८ | ... ६ |
| चादुत | | चादुतं | ... | १२ | ... ५ |
| दृष्टि | ... | दृस्टि | .. | १८ | ... १३ |
| ज्ञास | | ज्ञाता | | २५ | ... २ |
| प्राक्षना | | प्रक्षना | ... | २५ | ... १८ |
| दर्शन | ... | दर्श्व | ... | २३ | १ |
| चनेन | .. | चयेन | ... | २९ | ... १९ |
| मतेपो | | सतपो | ... | ३० | .. १३ |
| ङ्गुना | ... | ङ्गला | ... | ३१ | .. २ |
| विप्रकर्षः | | विप्रकषः | ... | ३५ | ... ० |
| ज्ञोश | .. | जय | ... | ४१ | ... १ |
| चुध | .. | चुध | ... | ४१ | ... १२ |
| मंत्रि | | मत्रि | ... | ४३ | ... १२ |
| मोर | .. | सार | .. | ४३ | १९ |
| चना | | चना | ... | ४५ | ... १४ |
| विमर्ग | ... | विसर्ग | ... | ५० | ... ११ |
| पौना | ... | पोता | ... | ५१ | .. ३ |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| शुद्धम् | | अशुद्धम् | | पृ० | | प० |
| अननी | ... | अनी | ... | ५३ | ... | ६ |
| अधू | ... | धधू | — | ५३ | ... | २० |
| अिदुी | ... | अिदुा | ... | ५५ | ... | ९ |
| आपि | ... | आंपि | ... | ६० | ... | ९ |
| आखिलं | ... | आखिल | ... | ६१ | ... | १३ |
| सत्य | ... | सह | ... | ६६ | ... | ४ |
| मधु | ... | चक्षु | ... | ६६ | ... | १८ |
| योनी | ... | योग | ... | ७४ | ... | ४ |
| धर्म | ... | र्मध | ... | ७५ | ... | २२ |
| श्वस | ... | श्वास | ... | ७६ | ... | ६ |
| दृष्टा | ... | दृस्टा | ... | ८२ | ... | ८ |
| गाम्येषु | ... | गाम्यषु | ... | ८३ | .. | १४ |
| अेषुो | ... | अेषुया | ... | ८६ | ... | २ |
| त्यं | ... | तं | — | ९४ | ... | १० |
| प्रमातून् | ... | प्रमातन् | ... | १०६ | ... | २२ |
| न षा, | ... | न षा | ... | १२५ | ... | ५ |
| पूर्व | ... | पूष | ... | १३१ | ... | ३ |

# अधिकरणरत्नमाला परमार्थदर्शनीया सवार्तिका ।

——:o:——

अमेयाद्दर्शनाम्भोधेरुच्चितैरर्थमौक्तिकैः ।
परमार्थाधिकरण-रत्नमाला विधीयते ॥ १ ॥

प्रथमाध्याये प्रथमाह्निके प्रथमाधिकरणमारचयति-

दर्शनं सार्थकमिदमथवा स्यान्निरर्थकम् ।
सत्त्वादृक्कृतां शास्त्राणां नैतस्यार्थो विभाव्यते ॥ १ ॥

---

वार्तिकानि-

उपक्रमः

कुत्र केन विधिना किमित्ययं वाममात्रविदुषां दुरावहः ।
यस्तु कौतुकमिति व्यतिस्पृहेन्वेषणं तु परमार्थदर्शने ॥ १ ॥
प्राच्यमार्गभटजीवितावधि प्रत्यगप्यथ कुपथिनोऽवयम् ।
अप्रमत्तविदुषां पथाप्ययं दर्शितं मतमिहापठं विना ॥ २ ॥
भट्टवल्लभमुखैरनापदैः सुक्रतुप्रभृतिभिश्च पत्त्वरैः ।
व्याहृतिप्रणयशून्यमीरितं संग्रहीतमिह तत्प्रवक्तृतः ॥ ३ ॥
देवशब्दकलितिदिव्यशक्तिभिः व्यापितामिरिह धूर्तवाजिनैः ।
वञ्चिते न परमार्थधीर्जने तां पुनर्जनयितुं यतामहे ॥ ४ ॥
शास्त्रभारनतस्कन्धरा अपि व्याहृतिप्रणयिनो विपश्चितः ।
नान्तुलेन परमार्थतत्परान्कर्तुमेव विपुलः परिश्रमः ॥ ५ ॥
शिल्पशास्त्रपयसा सरस्वतीं कामधेनुमिव विश्वतोमुखीम् ।
ह्यनुपास्य कितवप्रतारणां पोत्रिणीमिव निषेवते जनः ॥ ६ ॥

संग्रहश्च विवेकश्च व्यवस्थानाग्रहस्तथा ।
इत्थोगाभ्युदयौ चास्य दर्शनस्य प्रयोजनम् ॥ २ ॥
सूत्रम्—अथ परमार्थानुशासनम् । १।१।१।

---

(श्लो० १) पादुकाभ्यां विपद्राज्ञा मस्करी वसूवस्करः ।
भृकुंषानुचरो रामः सतीर्नाघेल्लनूनपात् ॥ ७ ॥
भल्लाकारो हरिर्दृष्टः केशः सर्पत्वमाप्तवान् ।
निर्विद्यः सर्वविद्दृष्टो भिक्षुश्चेष्टवृष्टिकृत् ॥ ८ ॥
कुंकारैर्मारणं सद्यो यथसेंहैमतायसः ।
सर्वेषांविषापनयनं जपेन च सर्पोक्रिया ॥ ९ ॥
मेखलाधनया पट्या निर्व्याख्यो ज्ञानसंक्रमः ।
विद्याद्याच्च प्रजोत्पत्तिर्धनाग्निर्ब्रह्मराक्षसात् ॥ १० ॥
दुंधं वायोर्धनं नट्या मेवत्वं व्यभिचारिण ।
कुषेर्ब्यंरविकित्सा च लयो अन्तः शिलाणुषु ॥ ११ ॥
जन्माङ्गालिङ्गणं वध्वाः प्रस्थाने शकुनास्फलम् ।
जातिस्मरत्वं बालानां ध्याने देवैश्च भाषणम् ॥ १२ ॥
दृष्ट्वा विद्यायाः स्पष्टं व्याहृता दृष्टिशालिनाम् ।
अन्त्यापुत्रानुसंधान सदसोन्वेष्यतां गताः ॥ १३ ॥
जले स्थले च वायौ च वाल्मनोकादिभिर्गमः ।
विदुषां सेवनं नित्यं शिल्पशास्त्राद्यवेक्षणम् ॥ १४ ॥
हरेरखेटनं स्वार्थे त्यागः सर्वज्ञमानिनाम् ।
विषव्याधिव्रणादीनां सद्भिषग्भिश्चिकित्सनम् ॥ १५ ॥

हेत्वाधिकरणमारभ्यते-

प्रमाणमस्ति वा नास्ति, नास्ति सर्वविदोपतः ।
अर्थोऽस्ति परिणामेपि प्रमाणत्रयगोचरः ॥ १ ॥
प्रत्यक्षमनुमानं च तथाप्तश्रुतिरित्यदः ।
तस्मात्प्रमाणमस्त्येव सहकारि परस्परम् ॥ २ ॥

भूतादौ प्रत्ययाभावः स्वोद्योगस्यावलम्बनम् ।
व्यवहारस्तदज्ञानं भक्तिराप्तेष्वहेतुका ॥ १६ ॥
चौरार्थं गमनार्थानां सद्यश्चाराधनं तथा ।
सर्वत्र कार्यसंबद्ध-कारणान्वेषणे श्रमः ॥ १७ ॥
प्रत्यादेशो व्याहतानामव्याहतपरीक्षणम् ।
दृष्ट्वा त्रिधा दृष्टाः परमार्थानुसारिणाम् ॥ १८ ॥
(अ० २) प्रत्यक्षेणानुमानेनाबाधेनाप्तागमेन वा ।
यो ज्ञापितः सदर्थः परमार्थ इति स्थितिः ॥ १९ ॥
यः प्रत्यक्षोपलम्भेनानुमितार्थेन वा पुनः ।
व्याहतोऽपरमार्थः स हेयः पारमार्थिकैः ॥ २० ॥
प्रत्यक्षे चानुमाने च कदाचिद्बाधसंभवः ।
तस्मात्तु नास्त्रिधावन्यत्प्रमाणं भवितुं क्षमम् ॥ २१ ॥
चरणाभ्यां प्रचरतः स्खलनसंभवे ।
कः पुनर्नासया गन्तुमनुन्मत्तोऽध्वन्यवस्थति ॥ २२ ॥
पश्यन्स्वप्नजाग्रद्दोषान्को वा मन्येत मायिकान् ।
व्याहतान्वा पिशाचादीन्गृह्णीयात्स्वारमार्थिकान् ॥ २३ ॥

सूत्राणि–अव्याहतः पुत्रवतीपुत्रक्रमः परमार्थस्तद्वन्धो वन्ध्यापुत्रसमः १।१।२ परमार्थः प्रत्यक्षानुमानाभ्यामबाधिताभ्यामसाद्वया च निर्णीतार्थया ।१।१।३ व्याहतिर्बाधः। १।१।४ विरोधोबाध इति भिक्षवः ।१।१।५ तानि त्रीणि प्रमाणानि प्रसिद्धानि ।१।१।६ प्रमाणविशेषाणामंशमात्रावगाहिनां विषयविभागो विरोधाभावः सहकारित्वं च ॥ १।१।७।

---

* श्वाश्वो रश्मिमगृह्णीता हि वायुभ्रमः पलायते ।
न वा प्रेतः पिता पिण्डभक्षणायेति देहभृत् ॥ २४ ॥
श्राद्धानुष्ठीयते पुत्रैः पितृणां जीवतां यथा ।
मृतेष्वपि तदादेशाच्चिद्वापो नतु तृप्तये ॥ २५ ॥
यथाह्निकानां मध्यादि-तरणं फलमुच्यते ।
तथैवानिष्टयोन्यादेः सृष्टिमाहुर्मिथ्यापजाम् ॥ २६ ॥
यः स्वर्गश्यादिलोभेन निरपेक्षो भयेन वा ।
भूतप्रेतपिशाचादि-तृप्तये वा विमूढधीः ॥ २७ ॥
धर्मं करोति तस्यस्य वाणिज्यं नैव धर्मधीः ।
वैश्यापत्नेभनैर्नैव निरपेक्षो भयैर्न वा ॥ २८ ॥
धर्माविघातिने यस्तु निर्हेतुर्यस्य धर्मधीः ।
तस्य ज्ञानं तपस्तस्य स धर्मात्मा स बुद्धिमान् ॥ २९ ॥
जीवतां वा मृतानां वा सफला निष्फलापि वा ।
कार्यैवाज्ञेति बुद्धिर्हि चार्वाकमुखमुद्रणी ॥ ३० ॥

तृतीयाधिकरणमारभ्यते-

प्रत्यक्षं संनिकृष्टांशे विप्रकृष्टेपि वा भवेत् ।
संभवेद्विप्रकृष्टेपि योग्यादीनां जगद्भृतेः ॥ १ ॥

---

भूतप्रेतपिशाचादि-स्थितौ मानं न दृश्यते ।
सत्त्वेपि मान्त्रा कः प्राज्ञः कुटुम्बोपेक्षया भजेत् ॥ ३१ ॥
पूर्वजानामदृष्टानां तु निवापादिविधिर्यतः ।
विधिरित्येव कार्यः स तत्र मानान्तरेण किम् ॥ ३२ ॥
ये पापिकभयादेव चौर्यं नैव प्रकुर्वते ।
चार्वाकास्ते न कुर्वन्तु विधौन्द्रपदभयोज्झिताम् ॥ ३३ ॥
ये राज्ञामभावेपि नैव चौर्यादि कुर्वते ।
धर्मभक्त्यैव सभ्यास्ते कुर्युर्मिहंतुकान्विधीन् ॥ ३४ ॥
यत्कदाप्यस्ति तत्सर्वं सदित्येव विनिश्चयः ।
क्षणिकत्वं स्थिरत्वं वा तसाधारणप्रयोजकम् ॥ ३५ ॥
कल्पस्थायी गिरिः सत्यः क्षणार्जीवी कर्मिर्न सत् ।
प्रेक्षावतामयं भेदो न जातु हृदयंगमः ॥ ३६ ॥
न पाटलिपुरं काश्यां न सा पाटलिपत्तने ।
विलोपमीदृशं पश्यन्कः शून्यपुरमाश्रयेत् ॥ ३७ ॥
विलुप्यमानं वैचित्र्यं वैचित्र्यान्तर आगते ।
पश्यंस्तथैव को ब्रूते निर्वैचित्र्यं प्रपञ्चताम् ॥ ३८ ॥
प्रत्यक्षं चानुमानं च तथाप्राप्तेरिति त्रयम् ।
विभक्तविषयं सिद्धं प्रमाणं नाधिकं ततः परम् ॥ ३९ ॥

द्वारेन्द्रियाद्यतिशयात्संनिकर्षवति स्फुटम् ।
प्रत्यक्षं विप्रकृष्टे तु वन्ध्यापुत्रायितं ध्रुवम् ॥ २ ॥

सूत्रे-संनिकृष्टार्थे सोपलभ्ययन्त्रादिद्वारायं प्रत्यक्षम् । १।१८

संनिकर्षो द्वारेन्द्रियविषयविशेषापेक्षः । १।१।६ ॥

चतुर्थाधिकरणमारभ्यते-

उपलम्भः सहायादेरुत्कर्षादुबाध्यते न वा ।
अस्य बाधो मुहुर्दृष्टः पृथिव्याः स्थिरतादिके ॥ १ ॥
अप्रमत्तोपलम्भस्य न बाधो दृश्यते क्वचित् ।
साधीयस्तां सहायादेरुत्कर्षात्संभवत्यलम् ॥ २ ॥

---

(श्र० ३) प्रत्यक्षं संनिकृष्टार्थे तद्विज्ञेनुमितिर्मता ।
दूरं वस्तुनि तत्सिद्धेनुष्ठेये तु विधेः प्रमा ॥ ४० ॥
दिव्यस्त्रीसोपरागादि-कालं को वेत्ति कश्चन ।
यन्त्राद्यिसंहकारेण गणितात्साध्यते हि तत् ॥ ४१ ॥
यन्त्राद्यसहकारेण गणितेपि कृते महत् ।
शेषाकलादौ वैषम्यं तस्माद्यन्त्राद्यपेक्ष्यते ॥ ४२ ॥
(श्र० ४) नौकायां वाष्यवाने वा गच्छंस्तीरादि मन्यते ।
चलत्यनिमुखं पायः पाश्चात्यि प्रथमं यथा ॥ ४३ ॥
तथा भुवि विसर्पन्त्यां परितो रविमण्डलम् ।
तारादृष्टेस्तमाकाशं भाति चलिमुखं जगत् ॥ ४४ ॥

सूत्राणि-सहायबुद्ध्याद्युत्कर्षात्साधुतरत्वं न बाधोऽप्रमत्तो-
पलम्भस्य । १।१।१० । मरुमरीचिकायां रूपमात्रोपलम्भे स्मृतस्य
रसादेरशा प्रमादः । १।१।११ । स दिग्भ्रम इवावधानमात्र-
साध्यः । १।१।१२ ॥

---

भूः स्थिरोत्पत्तिता यस्मात्सभवे सत्यपीहये ।
यामादिकं स्थिरत्वं तद्नुमित्याद्य बाधितम् ॥ ४५ ॥
यति प्रमादाद्गाते तद्दिष्टं बाधसंभवे ।
निश्चयः संशयस्थाने बाध्येतेति किमद्भुतम् ॥ ४६ ॥
प्रत्यक्षं विप्रकृष्टार्थे प्रमाणं नेत्यजानतः ।
तारापङ्क्तादिविज्ञानं नूनं यामादिकं भवेत् ॥ ४७ ॥
उपलभ्यामसे रूपं रसाद्यंशे मरीचिकाम् ।
अनुभवश्च तच्चित्रं पथिकाद्यो विपद्यते ॥ ४८ ॥
अनवस्थितागता यस्मात्करे धूर्तेन दर्शिताम् ।
यो मुद्रां मन्त्रजां मत्वा मन्त्रं दूरात्प्र साधयेत् ॥ ४९ ॥
कार्यशक्तिधनाद्दीनां स्थैर्यं कृत्वा च मूढधीः ।
किं चित्रं यद्विपद्येत मरौ हरिणको यथा ॥ ५० ॥
गोनाश्वाद्यापदभिज्ञोऽपि विपुले पत्तने यथा ।
दिङ्मूढो न विजानीयात्सुहृद्गेहस्थितिं जनः ॥ ५१ ॥
पटवाद्यप्रमाणादि-भारावगतकल्पनैः ॥
मन्यतेतान्यथाद्विष्टिं तथैव न विभावयेत् ॥ ५२ ॥

पञ्चमाधिकरणमारचयति-

प्रत्यक्षानुमयोः क्षेत्रे शब्दो मानं भवेन्न वा ।
शब्दो मानं भवेदेव नृणां विस्रम्भदर्शनात् ॥ १ ॥
शब्दस्य ज्ञापकत्वान्नास्त्यविधौ तु प्रमाणता ।
प्रत्यक्षं चानुमा चैव सिद्धार्थस्योपपत्तये ॥ २ ॥

सूत्राणि - असंनिकृष्टार्थेऽनुमानम् । १।१।१३ । इयमिदमविधौ १।१।१४ । तत्र शब्दः सहायो न तु प्रमाणम् । १।१।१५ ॥

षष्ठाधिकरणमारचयति-

विधेः स्वतो वा प्रामाण्यं परतो वा तदिष्यताम् ।
प्रत्यक्षादनुमानाच्च प्रामाण्यं दृश्यते विधेः ॥ १ ॥

---

प्रमादाढ्यमहाव्याधेरौषधानं हि भेषजम् ।
शास्त्रभाष्य प्रहसनं तार्किकस्तिमसुमक्षमम् ॥ ५३ ॥
नृणां भुवि गतिं वीक्ष्य यथा व्यायुगमानुगा ।
शब्दाद्वोधादिकं वीक्ष्य तथा दृष्टाद्वयानुगा ॥ ५४
अप्रमत्तस्य शास्त्रेषु मतनः स्यात्यारगमः ।
अन्धस्य ज्ञायानेपथ्यं शास्त्रज्ञानं प्रमादिनः ॥ ५५ ॥
(अ० ५) प्रत्यक्षमनुमानं च परिनिष्ठितवस्तुगम् ।
यत्कार्यं पुरुषाधीनं विधेस्तत्र प्रमाणता ॥ ५६ ॥
(अ० ६) सद्यानुष्ठेयतापेक्षे निर्णीतार्थे विधेः स्थिता ।
ज्ञातार्थज्ञाने क्रियाभावेऽनाप्तस्यानुगम्यता ॥ ५७ ॥

स्वतः आप्तविधेरत्र प्रामाण्यं परतो न तु ।
प्रत्यक्षस्यानुमायाश्च श्रवणाद्युपयोगिता ॥ २ ॥

सूत्रे—विधेस्त्वप्रमत्तेन श्रुतस्य स्मृतस्य चाप्तोक्तत्वे निर्णीतार्थत्वे च स्वतः प्रामाण्यम् १।१।१६। तत्र श्रवणादिमात्रोपयोगिनो प्रत्यक्षानुमाने १।१।१७ ॥

मतमधिकरणमारभ्यते—

कादाचित्कमिहाप्तत्वं किं वा स्यात्सार्वकालिकम् ।
अङ्गीक्रियेत पित्राद्देराप्तता सार्वकालिकी ॥ १ ॥
सर्वत्र रागद्वेषादि-हेतुव्याहतवादिता ।
सत्यां तस्यामनाप्तत्वमसत्यां पुनराप्तता ॥ २ ॥

सूत्रे—उपकारातिशयमूलकसंबन्धविशेषवानव्याहतवाक्यात्तो यथा पितरौ १।१।१८। व्याहतवादिता प्रमादादिजा विश्वसनीना १।१।१९ ॥

---

(प० ७) जन्मनाथ यस्मेति विधेयाक्षा पितुर्वचः ।
वसने वचनोद्धारानानयेति सुपेक्ष्यते ॥ ५८ ॥
संबन्धेनन्यसामान्ये पितृत्वादिप्रयोजके ।
म्लेच्छेऽपि व्याहता नाज्ञानुष्ठातुं शक्यते जनैः ॥ ५९ ॥
प्रमादरागद्वेषादि जन्या व्याहतवादिता ।
प्राच्येष्वपि च नव्येषु सर्वत्रैवोपलभ्यते ॥ ६० ॥
तस्माद्व्याहतं यस्यात्प्राच्यं वा नव्यमेव वा ।
तत्स्तोकांशे परोक्षांशे मिथ्यात्वं व्याहते स्फुटम् ॥ ६१ ॥

प्रकृताधिकरणमारभ्यते-

परीक्ष्यं व्याहृतं नो वा, परीक्ष्यं संशयेऽन्यथा ।
न परीक्ष्यं विनिर्णीत-व्याघातं शुद्धबुद्धिभिः ॥ १ ॥
एकांशदर्शनादेवाविवेकविकलैर्जनैः ।
व्याहतस्योपलम्भो हि प्राकाम्यादेः प्रघोष्यते ॥ २ ॥

सूत्राणि—व्याहतमपरीक्ष्यं तदुपलम्भस्य सर्वत्र प्रमादजत्वात् १।१।२० । सतोर्व्यतिकरस्य बाधितस्याप्येकांशदर्शनेन दुर्लभः प्रमादः १।१।२१ । सदृढो विप्रयर्थवादयोरर्थवादे च परीक्ष्यापरीक्ष्ययोरविवेकात् १।१।२२ ॥

---

(प्र० ८) यत्प्रत्यक्षोपलम्भेनानुमितार्थेन वा पुनः ।
यत्याहृतं तन्निष्प्रेव न तस्यानुगमः शुभः ॥ ६२ ॥
मैगरं दर्शयामीति प्रतिज्ञाय पथा व्रजन् ।
अनेलुगम्यते जातैर्न पुनः सरितं विशन् ॥ ६३ ॥
व्याकृतं पाठयामीति पाठयन्ननुगम्यते ।
मन्त्रसिद्धा भवेदित्थं इत्युक्तो ममुपेक्ष्यते ॥ ६४ ॥
तथा सिद्धौषधिभूतोऽयं वटस्तूर्तं उपेक्ष्यताम् ।
शिल्पशास्त्रमदुद्योगाननुगम्यः शुचिर्वदन् ॥ ६७ ॥
मूर्खाः सिद्धिविभूत्यर्थैरतिशेरेरते विपश्चितः ।
पश्यन्तो महाशास्त्रार्थान् यद्धेयाः कथं वत ॥ ६६ ॥
शास्त्राभ्यासेन शिल्पेन यदुद्योगैस्तथा परैः ।
न भक्त्या सिद्धमूर्खाणां वास्तवी सिद्धिराप्यते ॥ ६७ ॥

मनआधिकरणमारभ्यते-

प्रत्यक्षं मानसं नास्ति किंवास्ति, मनु नास्ति तत् ।
मनसो नेन्द्रियत्वं हि प्रत्यक्षं चेन्द्रियैरिह ॥ १ ॥
मनो मस्तिष्क नियतमुपलब्धृ स्फुटं च तत् ।
इन्द्रियं चोपलब्धृत्वात्तस्मात्स्मृत्यादि मानसम् ॥ २ ॥

---

महोद्योगैर्विपश्चिद्भिः शास्त्रशिल्पकलादिकम् ।
साधितं साध्यते चैत्र न धूर्तैः सिद्धनामभिः ॥ ६८ ॥
नीचा पशुक्षयश्चैत्र विद्योद्योगपराङ्मुखाः ।
दक्षन्तो जनसंमानं सिद्धीः पश्यापयन्त्यमी ॥ ६९ ॥
जुगुप्समानाः संमानाद्ब्राह्मणा वक्षसाटिनः ।
शिल्पशास्त्रकलोद्योगैः सिद्धिं व्यावदते पराम् ॥ ७० ॥
सिद्धेषु भक्त्या कल्याणं पापं तेषां परीक्षया ।
सिद्धसिक्थकमूर्तीनां परीक्षाग्नेर्महत्भयम् ॥ ७१ ॥
शिल्पशास्त्रकलोद्योगे परीक्षा तु पदे पदे ।
पारमार्थिकहेम्नः किं परीक्षाग्नेर्भयं क्व चित् ॥ ७२ ॥
वन्ध्या भार्या ममेत्यत्र वदतो वत्सरात्परम् ।
एकपक्षोपतप्तेयमो परिणेयो सुतो मम ॥ ७३ ॥
इति वाग्व्याहृता स्पष्टं व्याहृतिस्तु न लक्ष्यते ।
आद्यं विस्मरता वाक्यं लक्ष्यते स्मरतोभयम् ॥ ७४ ॥
विद्वेषं मारयन्धूर्तं सर्वाहि दर्शयन् ।
विज्ञानाभासमभ्यस्यन्निवस्त्यन्तिलोचधेः ॥ ७५ ॥

सूत्राणि—प्रत्यक्षमदोषेन्द्रियोपलम्भः १।१।२३। षड्विध-
मिन्द्रियाणां मनःषष्ठत्वात् १।१।२४। तानि चक्षुःश्रोत्रत्वग्रसन-
घ्राणमस्तिष्कस्थानानि १।१।२५। मानसं स्मृत्युत्प्रेक्षादि प्रसिद्ध-
मन्यत् १।१।२६॥

---

भूतप्रेतविशाचानां मन्त्राणां चाद्भुतं बलम्।
भक्त्येकगम्यं प्रख्याप्य प्रतारयति बालिशान् ॥ ७६ ॥
व्याहताव्याहतज्ञानाद्वैयर्थ्यविध्योश्च संकरात्।
ज्ञानविज्ञानदिङ्मूढो धूर्तानामेति वश्यताम् ॥ ७७ ॥
प्रामाण्यमविधौ नैव परिनिष्ठितवस्तुनः।
शब्दस्येत्यविज्ञानान्न विमुच्यति मुह्यमुहुः ॥ ७८ ॥
शब्देऽनुक्तेऽप्यनुक्तेऽपि परिनिष्ठितवस्तुनि।
प्रत्यक्षादनुमानाच्च तत्त्वातत्त्वविनिर्णयः ॥ ७९ ॥
यत्सानुषु फलानीति स्वाध्यायोध्येय इत्यपि।
सत्यो हेत्वनपेक्षैव विधिराप्तात्तु विधीयते ॥ ८० ॥
क्षुद्रो वाराणसीयामो गङ्गा पश्चिमवाहिनी।
नापरीक्ष्योररीकार्यं कस्यापि वच ईदृशम् ॥ ८१ ॥
वन्ध्यापुत्रस्य शिरसि फलं स्थितमिहानय।
ईदृशे तु परीक्षापि न कदाचित्प्रवर्त्यते ॥ ८२ ॥
(प० ६) षष्ठेनेन्द्रियेणात्र यत्किंचिदुपलभ्यते।
अनेकेन्द्रियसंवादात्तत्प्रत्यक्षं दृढं भवेत् ॥ ८३ ॥

द्वयमाधिकरणमारभ्यते-

अनुमानं प्रमाणं वा न वा, नास्य प्रमाणता ।
साहचर्यं न नियतं किं हि तत्र नियामकम् ॥ १ ॥
अंशांशिताऽत्र नियता तन्मूला चानुमा मता ।
तस्मात्प्रमाणमस्त्येवानुमानमिति निर्णयः ॥ २ ॥

सूत्राणि—अनुमानं प्रतिबद्धात्साधनात्साध्यग्रहः १।१।२७ । तादृशादंशादंशान्तरग्रहो वा १।१।२८ । द्विविधं सामान्यतो दृष्टं विशेषवच्च १।१।२९ ॥

चक्षुःश्रुतित्वयसन-घ्राणमस्तिष्कशक्तयः ।
इन्द्रियत्वेन विदितास्तत्प्रत्यक्षाणि षट् ततः ॥ ८ ॥
प्रत्यक्षात्मक एवासौ यः सदोषेन्द्रियग्रहः ।
संवादाशंसया दुष्प्रत्यक्षत्वेऽप्रमात्मकः ॥ ८५ ॥
(क्र०१०) व्याप्यादृव्यापकविज्ञानमनुमानमुदाहृतम् ।
व्याप्तिर्नियतसम्बन्धएकावयविनोंशयोः ॥ ८६ ॥
वह्नेर्हि धूम एकोंशः स्फुलिङ्गांशः परो मतः ।
अस्फुलिङ्गो न धूमः स्यात्स्फुलिङ्गः स्याद्धूमकः ॥ ८७ ॥
तत्त्वेनावयविज्ञानमकस्मा तार्किकाङ्गराः ।
ब्रुवन्त्यवयविज्ञानं प्रत्यक्षमपरीक्षकाः ॥ ८८ ॥
आहुः प्रत्यक्षमंशानां तथैवांशान्तरानुमाम् ।
अनुमानस्य बीजं चावयवित्वं परीक्षकाः ॥ ८९ ॥

सकार्यद्यधिकरणमारचयति-

लोकान्तरशिलाभाव-सिद्ध्यादेः संभवो न वा ।
संभवस्यानुमानं स्याद्वैचित्र्यस्याश्च दर्शनात् ॥ १ ॥
सामान्यदृष्टस्याज्ञाता विशेषा गुणलङ्घने ।
विप्लवे मध्यमस्यापि व्याहतौ च न संभवः ॥ २ ॥

---

अस्यावर्यावतस्यास्य ज्ञानाच्चार्वाकवत्त्वरे ।
नाधकाशेनुमानस्य प्रत्यक्षैकायनेभवत् ॥ ९० ॥
अनुमानस्य का घातो प्रत्यक्षमपि विस्मरन् ।
उत्तमर्णापदाघातमृणं कृत्वा घृतं पिबन् ॥ ९१ ॥
धन्यश्चार्वाकजरठो धन्यास्तस्यानुगामिनः ।
लोकायतं मतं चित्रं लोको न बहु मन्यते ॥ ९२ ॥
मन्त्रान्मुद्रां स्तवं घायो योगिन्युहपनं तथा ।
रक्षकत्वं व्याख्याने धनहत्वमुपानहि ॥ ९३ ॥
सहकारान्तरं चेदृक् स्वीकुर्यात्तार्किकाङ्कुरः ।
अन्नेःघयविलस्यास्य मुधा शास्त्रभरार्दितः ॥ ९४ ॥
अकृत्रिमं कृत्रिमं च सर्वमेव सकर्तृकम् ।
अज्ञातहेतुकं सर्वं मन्त्रप्रेतादिहेतुकम् ॥ ९५ ॥
इत्यादिकल्पनास्तर्कं भारनमशिरोभृताम ।
सहकारादृढां व्याप्तेः मुख्यकामप्यगृह्णताम् ॥ ९६ ॥
यदि न ज्ञायते हेतु कल्प्यते व्याहतः कथम् ।
अज्ञानबोधः साधीयान्विपरीतग्रहात्मतः ॥ ९७ ॥

सूत्राणि—सामान्यतो दृष्टे विशेषकल्पनं प्रमादः १।१।३० । संभवानुमानं तर्कः १।१।३१। स गुणाविलङ्घने मध्यमाविपर्यासे च १।१।३२ । न प्रत्यक्षेण सुव्यक्ताभिर्व्याप्तिभिर्वा विरोधे १।१।३३।

दृष्टाधिकरणमारभ्यते—

ज्ञानमस्ति न वा, नास्ति विज्ञानेवसितं हि तत् ।
सर्वात्मनः स्वयं स्वेन ज्ञानमस्त्येव निश्चितम् ॥ १ ॥
द्रष्टृदृश्येन्द्रियार्थानां स्वस्मिन्यद्ग्रहणे क्षमम् ।
अनिषेध्या ह्यसंदिग्धा प्रमाणानां च सा प्रमा ॥ २ ॥

अज्ञातपितृको नैव यतिरोमादिसङ्गतः ।
नाज्ञातो यज्ञदत्तश्च मन्त्रप्रेतादिशक्तिभिः ॥ ९८ ॥
धूमभस्मात्यरागादावनुमा बाधयिष्यताम् ।
वोह्यानुमानमात्रस्यापामाण्यं चेद्भवेत्तदा ॥ ९९ ॥
व्याप्यग्राहो पुरुषभान्तेः प्रत्यक्षमपि दूषितम् ।
मत्वा तदप्रमाणं न कथं हन्त मन्यसे ॥ १०० ॥
(अ०११) सामान्यतोदृष्टरीत्या यदि लोकान्तरानुमा ।
पुरोविमानरूपादेर्विशेषेणानुमितः कथम् ॥ १०१ ॥
संभवत्यत्र यत्र तस्य यद्व्याप्तिविषर्जनम् ।
व्याप्तं यत्स्फुटं तस्य संभवोपि न तर्क्यते ॥ १०२ ॥
मुखि धारात्व कस्यापि धायो धारानुमीयते ।
न पितुः शतजीवित्वात्परेषां कल्पजीविता ॥ १०३ ॥

सूत्रे—विज्ञानमदः १।१।३४ । ज्ञानं सर्वात्मोपलंभस्तत्प्रमाणं प्रमाणानाम् १।१।३५ ॥

त्रयोदशाधिकरणमारभ्यते-

विध्यर्थवादयोरन्याविवेको हानिकृन्न वा ।

अर्थवादे विस्रम्भान्न हानिः कापि दृश्यते ॥ १ ॥

अर्थवादेषु विस्रम्भाज्ज्ञानविज्ञानविप्लवः ।

सिद्धो हि ध्रुवे चरन्पद्धयां ज्ञानाद्यैः किं करिष्यति ॥ २ ॥

---

पौलस्त्यो भास्करस्पर्शी वेदेहो मुनिशेखरात् ।

पत्युक्तिरीदृशी सर्वा न भ्रष्टेया कथं चन ॥ १०४ ॥

फलं परत्र सर्वत्र सर्वज्ञत्वं तथात्मनि ।

प्रमादपवनः शिष्टधूर्ताः परिहार्याः प्रयत्नतः ॥ १०५ ॥

(१०१२) दृष्टुर्बहिर्वा विषयोपलम्भो विज्ञानमेतद्विदितं जनानाम् ।

ज्ञानं तु सर्वात्मन ईश्वरस्य स्वस्मिन्स्वरूपस्य किलोपलब्धिः ॥१०६

मनः शरीरं च सहेन्द्रियं तथा ततोपि बाह्यान्विषयानिहात्मनि ।

स्वयं स यः साक्षितयेक्षते विभुः स एक एव प्रमितेः परा प्रमा ॥१०७॥

क्षणस्य कल्पस्य च यत्र नो भिदा चिदात्मनि स्वप्रमितौ चिरस्थितौ ।

अशेषवैचित्र्यमयः सकेवलं क्षणेषु साम्यव्यतिरेकवोत्तरः ॥१०८॥

अमुष्य सर्वात्मन ईदृशेर्भिदाश्चिदात्मनो बुद्ध्युदयादिविस्तवः ।

अधर्मसज्ज्ञानमभक्तिमापिता न तत्त्वमेतस्य विदन्ति ये जनाः ॥१०९॥

सूत्रे—विपर्ययवादमेऽद्वयाविवेकादिभ्रमः १।१।३६। व्याहतान्याहतदिगन्तराविवेकस्तत्सद्भावो ज्ञानविज्ञानविप्लवहेतुः १।१।३७।

इति प्रथमाध्याये प्रथमाह्निकम्।

प्रथमाध्याये द्वितीयाह्निकं प्रथमाधिकरणमारभ्यते—

अस्ति वा नास्ति वा दिव्या दृष्टिरस्ति यया जनः।
वेत्ति नाहृष्टान्पठति प्रतानपि च पश्यति ॥ १ ॥

---

(श्र० १३) येषां सिद्धपिशाचमन्त्रसङ्घे भक्तिः किल व्याहते
प्राच्योक्तेश्च सुरार्णवात्रिषु भयं यद्वा तदाज्ञास्विव।
ज्ञात्वाप्यत्ययनेयसाहसधियां तेषां विमूढात्मनां
द्विड्मोहादभयतामिवानुगमनं सद्यो निपातावहम् ॥ ११० ॥

इति प्रथमाध्याये प्रथमाह्निकम् ॥

——:0:——

(श्र० १) दिव्यदृष्टिरनुमेव न चान्या व्याहतिप्रणय एव तथाऽन्यम्।
भावि भूतमथ यच्च भवत्तद्विप्रकृष्टमनुमानविगाह्यम् ॥ १ ॥
दिव्यशक्तिविभवादनुशास्ते के चरन्द्रुतमुपैत्यधि पश्चैः।
को निशम्य गिरमीदृशमास्ते स्वानुजेक्षणसमुच्चलकण्ठः ॥ २ ॥
भारताद्यधि हि पश्यति सिद्धो ह्यन्न सिद्धपुरवृत्तमशेषम्।
पक्षखण्डकलनक्षमणि एष्टे पुस्तकस्य स कथं हतदृष्टिः ॥ ३ ॥
धुं त्रिभेदि न कथं मम शापात्तत्त्वमत्र ननु भक्तिविगाह्यम्।
दाम्भिकादिति निशम्य न धृष्टश्चाहमप्यजनि पौरुषकलोकः ॥ ४ ॥

नानुमानातिरिक्तास्ति दृष्टिर्दिव्या तु का चन ।
अनुमानात्मिका सा चेदस्तु व्याप्तिग्रहादिजा ॥ २ ॥

---

भारतप्रणयनादिमहिमा गौरवं भरतवर्षकवीनाम् ।
सिद्धपूर्तसमजस्य महत्त्वं दिव्यशक्तिकपटाप्रथमेव ॥ ५ ॥
दिव्यशक्तिमधिगम्य तु सिद्धात्कुक्कुरोपि विदधीत निबन्धान् ।
विद्यया पुनरनल्पकमल्पोऽनल्पधीश्च कुरुते किल कार्यम् ॥ ६ ॥
सिद्धपूर्तयंत्रोभिः किं मृच्छया दिव्यशक्तिषु ।
विद्योद्योगादि संत्यज्य निराशान्कुरुपे पितॄन् ॥ ७ ॥
सर्वतो जयमन्विच्छेत्पुत्रादिच्छेत्पराभवम् ।
आशा पितॄणामित्येषा व्यर्थयेन्मूर्ख एव ताम् ॥ ८ ॥
पूर्वजानामर्थोणां को दिव्यानां तुल्यतां व्रजेत् ।
पुत्रात्पराभवस्याशां तेषां कन्तति धीरियम् ॥ ९ ॥
मायाविद्रादिभिर्मिथ्या-प्रपञ्चैर्वञ्चितं जगत् ।
अनुद्योगपरं धन्य-विसर्पेण निपीडितम् ॥ १० ॥
प्राचीनसभ्यता तस्मिन्दुर्विषहैं व्यलुप्यत ।
आविर्भूता नवान्यत्र भारते नोपलभ्यते ॥ ११ ॥
विद्योद्योगवतां यत्नात्तेषात्राविर्भवन्त्यपि ।
आध्यात्मिकाविषावाट-वाक्यकूटं हा विषोद्गति ॥ १२ ॥
वैज्ञानिका महोद्योगा अस्तुवन्तोपि पूर्वजान् ।
मुक्तान्मुक्त्वनयन्त्येवां सत्पुत्रोर्हं यशः स्थिरम् ॥ १३ ॥

सूत्रम्—न दिव्या दृष्टिरनुमानानतिरेकात् १।२।१ ॥

---

पितरो दिव्यशक्तित्वादनन्यास्याश्रयेभवाः ।
इत्यादि कीर्तयन्युत्रः कलङ्कयति नान्धकुधीः ॥ १४ ॥
न दिव्यशक्तिमत्त्वेन पितृत्वेनैव पूर्वजाः ।
पूजनीया यतस्तस्मात्स्तुतिस्तेषामनर्थिका ॥ १५ ॥
यस्तु सिद्धा इति पितॄनर्चयेन्मोहविक्लवः ।
स नीचान्सिद्धिविख्यातान्सहसा पूजयिष्यति ॥ १६ ॥
मोक्षरेभ्यहरिश्चन्द्रावरजा हि महौजसः ।
न वयं सिद्धधूर्तानां जातु सिद्धिषु लोलुपाः ॥ १७ ॥
राज्यत्यागाच्चाभिशापाद्भीष्मः सिद्धिं परां दधे ।
विससर्ज हरिश्चन्द्रो विभूतीः पक्षपातं प्रति ॥ १८ ॥
श्रुतिदर्शनविज्ञानां सूत्राख्यायपशस्यिनाम् ।
भारताद्विप्रणेतृणां दायादा भारता वयम् ॥ १९ ॥
आपस्यकाश्यविज्ञाने कोर्थो जगति नः किल ।
दिव्यदृष्ट्या महामूर्ख-घूकदृष्ट्येक्षगम्यया ॥ २० ॥
यन्त्रादिसाधनोपेतैरवधानपुरःसरम् ।
सूर्यादिदृष्टेर्भुवन-ज्ञानं ज्योतिर्विदां स्फुटम् ॥ २१ ॥
तत्सूर्यसंयमाच्चुक्रेरिदंपदं पतञ्जले· ।
वेद्यानिकामं कोर्थः स्याद्विम्बचिन्तादिमात्रतः ॥ २२ ॥
विम्बध्यानादिमात्राद्वा जगज्ज्ञानं यदीष्यते ।
सार्वज्ञैः, कस्तदर्थो नस्तेषां व्याहृतया गिरा ॥ २३ ॥

द्वितीयाधिकरणमारभ्यते—

अपौरुषेयं पुरुषोद्भवं वा श्रुतिवाङ्मयम् ।
अपौरुषेयं दिव्यं स्याद्यद्वेदोद्भासितं भुवि ॥ १ ॥
मधुच्छन्दःप्रभृतिभिराम्नातं प्रथितं स्फुटम् ।
नापौरुषेयं तस्मात्तदैशं तु निखिलं जगत् ॥ २ ॥

---

श्लो० २) अपौरुषेयतां को नु नृगिरां भावयेत्सुधीः ।
स्त्रीमन्त्यापौरुषेयत्वं श्रुतीनामेव तत्कथम् ॥ २३ ॥
विश्वामित्रवसिष्ठादि पर्णांसाः श्रुतयः किल ।
अग्निमीलदसि स्पष्टं मानुष्यो गिरईदृशः ॥ २४ ॥
अज्ञानवत्कृकत्वाद्वा यन्त्राद्वेरागमाच्च वा ।
भ्रान्तिरुपेत्सा स्वनयाद्यशब्दादावपि संभवेत् ॥ २५ ॥
विधिमंत्रुष्यशब्दोत्र दिव्यमव्याहतं मतम् ।
आसुरं व्याहतं प्रोक्तमुपचारेण मानवैः ॥ २७ ॥
अव्याहतानां स्वीकारं व्याहतानां च वर्जनम् ।
चकारमनपेक्ष्यैव शिष्टाः कुर्वन्त्यसंशयम् ॥ २८ ॥
तत्र चकारनपेक्षत्वात्तच्छिष्टाचारदर्शनम् ।
विधेस्तु चकारपेक्षत्वान्मानुषत्वमुदाहृतम् ॥ २९ ॥
अपौरुषेयता तस्माच्छ्रुतौ वेदोपबृंहिकी ।
मनुष्याद्येयताहेतुर्व्याहतेषु कथं न सा ॥ ३० ॥

सूत्राणि—नापौरुषेयो मानुषः शब्दो व्याहृतेः १।२।२ । न च तत्समवेयि शब्दमाहात्म्यं कीचकध्वनिवत्स्वनग्राहवद्ग्राह्यता-ग्रेखकृपत्रवच्च १।२।३ । वाचि देवासुरमानुषरूपणं परमार्थव्या-घातविधिरक्षणम् १।२।४ । भवेदपौरुषेयत्वमप्याद्ये पुरुषानपेक्ष-त्वात् १।२।५ । तथा तु व्याघातोपि १।२।६ । तस्मादपौरुषेयत्व-मुपादेयत्वाप्रयोजकम् १।२।७ । न वाचि सर्वात्मीयत्वादूषदुमानो-विश्वस्यैव तथात्वात् १।२।८ ॥

---

वाचोपविष्टा ये मन्त्राः किलर्षिभ्योऽवरैः श्रुताः ।
ते समाम्नायविरहाच्छ्रुतयः पथिता भुवि ॥ ३२ ॥
ग्लायत्प्रभिरुपदेशायाम्नाता एतास्ततोऽवरैः ।
श्रुतीः स्मृत्वा प्रणीतास्तु स्मृतयः परिकीर्तिताः ॥ ३३ ॥
सर्वात्मीयं जगत्सर्वं को विशेषः श्रुतेस्ततः ।
तस्माच्च सर्वात्मीयत्वं श्रुत्याप्तृत्वप्रयोजकम् ॥ ३३ ॥
अस्य भूतस्य महतो यज्ञःश्वसितरूपणम् ।
अनुव्याख्यानपर्यन्ते तत्समस्तेपि वाङ्मये ॥ ३४ ॥
अन्नतः प्रकृतेर्ज्ञानं सर्वं प्रकृतिवीक्षणात् ।
सर्वात्मना प्रकृतिश्चेति बादरायणसंमतम् ॥ ३५ ॥
अद्वैतत्राविनां भेदाः प्राकृताप्राकृतादयः ।
अर्थतस्तत्तस्मात्सर्वतः सत्यमाहृतम् ॥ ३६ ॥

तृतीयाधिकरणमारभ्यते-

विध्यर्थवादयोर्भेदः स्वरूपेस्ति पुनर्न वा ।
न स्फुटोस्ति तयोर्भेदस्तस्मादयमुपेक्ष्यताम् ॥ १ ॥
आसीद्भविष्यत्यस्तीति ह्यात्मकादर्थवादतः ।
इदं कुर्वितिरूपस्य विधेर्भेदः परिस्फुटः ॥ २ ॥

(अ० ३) भूद आसीदिदं वास्ति भविष्यत्येतदीदृशम् ।
अर्थवादाख्यया ख्यातं शब्दोत्र ज्ञापकः परम् ॥ ३७ ॥
इदं कुर्वंति सर्वस्य विधेराकारदर्शितः ।
तस्य शब्दैकमेयत्वं हेतूनां त्वर्थवादता ॥ ३८ ॥
उपपादकतैवात्र प्रामाण्यं ज्ञापनं न तु ।
प्रामाण्यमर्थवादे तत्प्रत्यक्षानुमयोः परम् ॥ ३९ ॥
अर्थ एकोत्र जायादेः संग्रहस्तद्विधो भिदाः ।
शिविकायानशय्यादौ वरस्यारोहणं यतः ॥ ४० ॥
सर्वस्य स्थपिता मेयान्त्रिवृद्वान्वा मूर्ख एव वा ।
यथैव स्वविधिः मेयान्सफलो निष्फलोपि वा ॥ ४१ ॥
स्वधर्मे निधनं मेयः श्रीकृष्णोपि जगाद्यतः ।
भमयो धर्मनिःमेणावस्तिमीलनकेलयः ॥ ४२ ॥
अप्याहृतो य आप्तस्य विधिस्तस्य फलं क्रमः ।
अन्विष्यैव भवत्यासुं वाणिज्यास्वनुतिष्ठति ॥ ४३ ॥

सूत्राणि—शब्देार्थवादविधिभिन्नः १।२।६ । आसीदस्ति भविष्यतीत्यर्थवादः १।२।१० । भवितव्यमिति विधिः १।२।११ सा जैमिनेश्चोदना १।२।१२ । एकोर्थो वैकल्पिका विधयः १।२।१३ ॥

चतुर्थाधिकरणमारचयति-

सर्वाः प्रतिज्ञाः पित्रादेः स्वीकार्या वा न वा जनैः ।
स्वीकार्या एव पित्रादेरासत्वादखिला अपि ॥ १ ॥

---

मातापितृनृपाचार्य-विधीँस्तस्माद्धेतुकम् ।
अनुतिष्ठेच कुर्वीत तत्र हेतुपरीक्षणम् ॥ ४४ ॥
स्वास्थ्याय गोमयस्पर्शो बलवृद्ध्ये सुरां पिबेत् ।
तस्माद्विधिषु हेतूनां न प्रशस्ता गवेषणा ॥ ४५ ॥
(क्र० ४) एकापेक्ष्योपपत्तिश्च चान्यानपेक्ष्योपपत्तिका ।
परोपपत्तिविहता प्रतिज्ञा त्रिविधा ततः ॥ ४६ ॥
प्रतिष्ठापटवर्णादि रामभारोहणादिकम् ।
तथैव स्तुतिपाठाद्यमनपेक्ष्योपपत्तिकम् ॥ ४७ ॥
सर्वात्मोपेषु कार्येषु यावच्चैव क्षतिर्भवेत् ।
तावद्धेत्वनपेक्षैव कार्या तेषामनुष्ठितिः ॥ ४८ ॥
स्तुतिपाठस्य येनायां जनेषूपप्लवो यदि ।
को वा जनपदाध्यक्षः स्तुतिपाठं न हास्यति ॥ ४९ ॥
आचारपालनं तावद्यावद्धर्मस्य न क्षतिः ।
पारमार्थिकधर्मारिमाचारं परिवर्जयेत् ॥ ५० ॥

अनपेक्षितोपपत्तित्वाद्विधिः स्वीक्रियतां जनैः ।
अपेक्षितोपपत्तित्वादर्थवादः परीक्ष्यताम् ॥ २ ॥

---

सिद्धोच्छिष्टैर्मतैर्बुद्धिः परोक्तार्थावलोकनम् ।
उपपत्तिहतं सर्वमीदृशं दृश्यतस्त्यजेत् ॥ ५१ ॥
पुण्यकादिकथानां च मध्यादिक्षरणस्य च ।
निद्रापजायास्तृप्तेश्चापुत्रायुष्टत्वस्य वा नृणाम् ॥ ५२ ॥
स्थितमत्युक्तिमात्रत्वं नोपपन्नं हि तादृशम् ।
उपपत्तिविरुद्धेषु सर्वेष्वीदृक्षु वर्जयेत् ॥ ५३ ॥
शैलार्णवादवस्थानमीदृगन्यच्च यद्भवेत् ।
तस्योपपत्तिरन्येभ्या सत्यापेक्ष्योपपत्तिकम् ॥ ५४ ॥
प्रत्यक्षमनुमानं वाप्युपपत्तिर्वा योज्यते ।
यत्र नान्यतरस्य स्यात्तत्रानुपपन्नता ॥ ५५ ॥
संभवत्येतयोर्दोषो नत्वन्या दोषवर्जिता ।
अपमत्तैस्तयोर्दोषापनयाय प्रवर्त्यताम् ॥ ५६ ॥
अशुचित्वादिसंबन्धः सर्वत्रैव नृणां यतः ।
अक्षमानं वा पिशाचं वा कः करोतु गुरुं ततः ॥ ५७ ॥
तथाशक्ष्य सदोषत्वं प्रत्यक्षानुमयोर्जनः ।
शब्दस्य नैव प्रामाण्यमविधेयं कर्तुमर्हति ॥ ५८ ॥
वन्ध्यापुत्रादिशब्देभ्यो न तदर्थस्य सत्यता ।
न पुण्यकादिशब्देभ्यो विमानादेश्च सत्यता ॥ ५९ ॥

सूत्राणि-प्रतिज्ञा सोपपत्तिकानपेक्षितोपपत्तिकोपपत्तिविरुद्धत्वात्त्रिविधा १-२-१४। सा च प्रत्यक्षोपलम्भानुमितिर्वा १-२-१५। शब्दोपलम्भः शाब्द इति चेन्न शब्दस्थितिमात्रोपपादकत्वात् १-२-१६। न व्याहतार्थः शब्द इति चेन्न वन्ध्यापुत्रादिमत्त्वात् १-२-१७। आप्तत्वानुमानात्तदुक्तेः सोपपत्तिकत्वानुमानमिति चेन्नार्थवादे प्रमादस्य सर्वत्र संभवात् १-२-१८। अबाधादाप्तत्वं नाप्तत्वादबाधः १-२-१९॥

---

स्वर्णं जानन्गिरिं जानन्यथा स्वर्णगिरिं व्रजेत्।

तथा विमानमाह स्म रथं चोड्डयनं स्मरन्॥ ६०॥

अनुमायाप्ततां वक्तुर्वक्ष्यन्सत्यवादिताम्।

प्रमादसंभवादुक्तेः संशयार्हो न किं व्रजेत्॥ ६१॥

न सार्वकालिकं कस्याप्याप्तत्वं दृश्यते क्व चित्।

अबाधितार्थवक्तृत्वात्तन्मात्रे साप्तता मता॥ ६२॥

पित्राक्ष्णेन पुत्रस्य वधः पुत्रेण वा पितुः।

कस्याप्ततां कः प्रतिमान्सार्वकालिकीम्॥ ६३॥

भक्त्या पाणानपि त्यक्त्वन्गुर्वादेशेषु मानवः।

अबाधसंभवेवैति विधेः गुरुजनाप्ततां॥ ६४॥

सबाधसंभवे स्वर्णवादे कस्यापि साप्तता।

बाधजाबाधितोऽर्थस्तु निर्णीत उपपत्तिभिः॥ ६५॥

पञ्चमाधिकरणमारचयति-

उपपत्तिविरुद्धस्य विधेरनुगमो न वा ।
कार्यमेवानुगमनं श्रेयसोनादरेऽन्यथा ॥ १ ॥
उपपत्तिविरुद्धस्यासंभाव्योनुगमः स्फुटम् ।
तद्धेतुरप्यनाप्तत्वं वाचि व्याहतिदर्शनात् ॥ २ ॥

---

( अ० ५ ) अर्थवादस्ततः सर्वं उपपत्तिमपेक्षते ।
उपलब्धोपपत्तेश्च सत्यता तस्य नान्यथा ॥ ६६ ॥
अनपेक्ष्योपपत्तिस्तु विधेयेन विधीयते ।
सहेतुर्वाप्यहेतुर्वा सद्योनुष्ठीयते ततः ॥ ६७ ॥
उपपत्तिमपेक्ष्यापि कदाचिद्वा यदृच्छया ।
विधायकैस्तु विधयो विधेयेषु निदेशिताः ॥ ६८ ॥
भक्ष्याभक्ष्यादिविधयो हेत्वपेक्षा उदाहृताः ।
वृषचर्मासनाद्यं तु न सर्वत्र सहेतुकम् ॥ ६९ ॥
मन्त्रपाठादिभिः प्रेत बन्धस्फोटो भविष्यति ।
नर्मदेश्वरविल्वैश्च स्पर्शादङ्गान्युपैष्यति ॥ ७० ॥
इत्यादि मूर्खवाचाट-पोटाठीनां कुकल्पनाः ।
निरस्य तस्माद्धेतुर्विधेरनुमतिर्मता ॥ ७१ ॥
उपपत्तिविरुद्धस्तु विधिर्यश्चाविधिस्तथा ।
दृष्टा न तस्यानुमतिर्विनिपातफला हि सा ॥ ७२
तालठघमणेरर्थे पितुः कूपे पतिष्यतः ।
निवारणं सुतः कुर्यात्पतनाढात्मनस्तथा ॥ ७३ ॥

सूत्राणि—सोपपत्तिकोऽर्थवादः १-२-२२। विधिरनपेक्ष्योपपत्तिको विधेयस्य १-२-२१। उभयथा विधायकस्य १-२-२२। उपपत्तिविरोधादुन्मत्तप्रलापस्तस्य नानुगमो निरोधस्तु प्रमाणात् १-२-२३॥

षष्ठाधिकरणमारचयति—

अर्थवादा असंदिग्धाः शब्दमात्रोदिता न वा।
महतामुदिताः शब्दैरसंदिग्धाः कुतो न ते॥ १॥
प्रत्यक्षमनुमानं वा न यावद्बाधवर्जितम्।
शब्दमात्रोदितस्तावदर्थः संशयगोचरः॥ २॥

सूत्राणि—अर्थवादः संदिग्धोऽसंदिग्धश्च १-२-२४। बाधसंभवे शब्दमात्रप्रतिपादने वा संदेहः १-२-२५। अबाधिते प्रत्यक्षेऽनुमाने वा तदभावः १-२-२६॥

सप्तमाधिकरणमारचयति—

अव्याहतेर्थवादे स्यात्संशयो व्याहतोऽपि वा।
व्याहतेर्दुष्करं ज्ञानं तस्मात्सर्वत्र संशयः॥ १॥

---

( अ० ६ ) असंदेहसंदेहावर्थवादौ द्विधा मतौ।
प्रत्यक्षे वानुमाने वा निर्बाधे नैव संशयः॥ ७४॥
प्रत्यक्षे वानुमाने वा संजातबाधसंभवे।
संशयः शब्दमात्रोक्ते त्वर्थवादे सदोचितः॥ ७५॥
( अ० ७ ) असंशयोऽपि द्विविधो भावाभावावगाहनात्।
उपपन्नस्य भावः स्याद्व्याहतस्य त्वसंभवः॥ ७६॥

पक्षज्ञानेपि तद्धर्म्य-व्याहतिज्ञानदर्शनात् ।
निश्चिताव्याहृतावेव संशयो नेतरत्र तु ॥ २ ॥

सूत्राणि—असंदेहो भावावगाहो १ २ १७। संदेहो व्याहति-रहिते प्रवृत्तेरबाधकः १ २ २८। व्याहतेतु सद्योऽसत्यतानिश्चयो वक्त्रादिनिरपेक्षः प्रवृत्तेर्बाधकः १ २ २९। यत्किंचिज्ज्ञानात्तद्धर्मी-यव्याहतिज्ञानं तथा चारुणिः १ २ ३० ॥

---

उपपत्तिपदीक्षे यः संशयः समुदाहृतः ।
सोपि निर्व्याहतावेव व्याहतस्य स्वसत्यता ॥ ७७ ॥
संदिग्धेपि प्रवृत्तिस्तु स्याद्व्याहृतिविवर्जिते ।
छागशार्दूलसंदेहे सखड्गः प्रविशेत्सुखम् ॥ ७८ ॥
कामं वेदोपि वक्त्रादेर्व्याहृते तु न सत्यता ।
असत्यस्वपदः सद्यः प्रवृत्तेर्बाधकश्च सः ॥ ७९ ॥
स्थूलदृश्यैकधर्मस्यापि वृक्षस्य च परीक्षणे ।
व्याहृतं वह्निना वृक्ष-सेचनं ज्ञायते जनैः ॥ ८० ॥
ज्ञाने सर्वस्य धूमादेर्व्याप्तिज्ञानं न चान्यथा ।
इति चार्वाकरूपस्तु सर्वथा व्याहृतः फुटम् ॥ ८१ ॥
एकस्य सकलकर्तृस्य ज्ञानात्कार्ज्ञायते कृताम् ।
विज्ञानं सर्वमेव स्यादिति चाक्षिरपीक्षते ॥ ८२ ॥
तद्धर्मोयस्य कस्यापि ज्ञानाद्व्याहृतिदर्शनम् ।
धर्मे तस्मिन्भवत्येव निर्णयेद्व्याहृतिं ततः ॥ ८३ ॥

अष्टमाधिकरणमारभ्यते—

प्रमादाद्दृष्टिभेदाद्वा बन्ध्यापुत्रगवेषिभिः ।
दृश्यते मन्त्रशक्त्यादि र्दृष्टिभेदादिदं भवेत् ॥ १ ॥
प्रमादादीदृशं दृश्यं प्रमादस्य च हेतवः ।
आप्तस्वंकल्पना दोषा विस्मयाद्याश्च चेतसः ॥ २ ॥

---

( अ० ८ ) आप्तस्वानुचितेः सत्यं वक्ष्येऽथेति दुर्ग्रहः ।
वैज्ञानिकाद्भुतेश्चैव विस्मयाख्यो निबन्धनम् ॥ ८४ ॥
गुणस्य लङ्घनं तर्के मध्यमस्य विपर्ययः ।
व्याहतांशानवगतिः संक्षेपो मानसस्तथा ॥ ८५ ॥
अवधानाधिकाराढेरसम्यक्परिशोधनम् ।
बन्ध्यापुत्रानुसन्धान-सदृशो भ्रमहेतवः ॥ ८६ ॥
युधिष्ठिरं गृहीत्वाप्तं सत्यमेव वदिष्यति ।
इतिभ्रमाद्गुरुद्रोणः संपदाये व्यपद्यत ॥ ८७ ॥
अनुमानोपपत्तं यत्प्रत्यक्षेणोपलभ्यते ।
वैज्ञानिकाद्भुतं दृष्ट्वा कस्तद्विस्मितमानसः ॥ ८८ ॥
प्रत्यक्षेणानुमानेन स्फुटं प्रत्याहृतं हि यत् ।
वृणां शिलाप्रवेशादि तच्चक्षुर्ध्यानसत्कृतं यत ॥ ८९ ॥
गच्छाम्यहं पठत्यन्तं परः क्रोशत्यतं तथा ।
अनेन गतिभेदेन तर्कयेत्को मतीदृशम् ॥ ९० ॥
पिता चेच्छतजीवी स्यात्पुत्रजीवी सुतस्तथा ।
क्रोम्नात्यूर्वयुगीयानां मन्येतायुस्त्रजीवितम् ॥ ९१ ॥
मुद्रात्याद्युत्तरेणाक्ष्णोः स्पष्टं व्याहतमीदृशम् ।
दर्शनस्तः कथां मन्दाक्षरो वक्ष्यति ॥ ९२ ॥

सूत्राणि-वन्ध्यापुत्रान्वेषिणां प्रमादहेतवः १-२-३१। आप्तत्वानुमानं प्रत्यक्षैर्विज्ञानादद्भुतैर्विस्मयपारवश्य गुणविलङ्घी मध्यमत्रिपर्यासवांश्च तर्कः १-२-३२। व्याघातांशस्य प्रच्छन्नस्यादर्शनमौत्प्रेक्षिकः

कन्या वा विधवाः कामं सिद्धधूर्ताङ्गभस्मजान्।
व्यापयेयु सुतांस्तेषां जारजत्वं तु निश्चितम् ॥ ९३ ॥
महाफलानि दृष्ट्वापि न तर्कयितुमर्हति।
मन्त्रप्रेतादिजन्यानि तान्युन्मादविवर्जितः ॥ ९४ ॥
सामान्यं कारणं तेषां छलाच्चैव विभाव्यते।
न जारनामाज्ञानेन वैधवेयस्तु देवजः ॥ ९५ ॥
केचिज्जले स्थले वापि यानत्रयमतर्कयन्।
मन्त्रोक्षितं रथं पश्चात्सर्वगं समकल्पयन् ॥ ९६ ॥
पादुकागुटिकाद्यैश्च संप्रत्याहुर्विचक्षणम्।
अयमौत्प्रेक्षिको हन्त संक्षेपो भाग्यते स्थितः ॥ ९७ ॥
पूर्वं गवाश्वयानादि याव्ययानं ततः परम्।
ततश्च वैद्युतं व्योम-यानं चेति महाजसाम् ॥ ९८ ॥
क्रमो द्वीपान्तरीयाणां विकासो वास्तवो यतः।
चतोजसां व्यथामेष नूनं मार्गो विधास्यति ॥ ९९ ॥
विनाधिकारभूम्यादि-शुद्धिं यो हेतुनिर्णयः।
कः पक्षधीत प्रेक्षावांस्तस्मिन्बालिशजल्पिते ॥ १०० ॥
कुतुकजानमिदं किल दर्पतो ननु मनूनयि विश्वसितोद्धताः।
इति सदर्पमुदीरयतो द्रुतं घनविशोधनमेव परीक्षणम् ॥ १०१ ॥
विधविधिकरसनमवघोषणैः सजलसेकमुपक्रमते जनः।
यदि तदाचरघोषणवर्जितः किमु विधिर्न स एव विधीयते ॥ १०२ ॥

संक्षेपोधिकारसाधनावधानभूम्याद्यशोधनं च १-२-३३ । उत्पादने घनाविशोधनम् १-२-३४ । मन्त्रे जाङ्गुलाविदा विषबलापरीक्षणं निर्मन्त्रक्रियाफलादर्शनं च १-२-३५ । परोक्षज्ञाने पत्राङ्कादिसु-अनिर्णयप्रश्नानुपन्यासः १-२-३६ । योगेवान्तरोपायानपेक्षादि १-२-३७ । एतेनेदृशं सर्वं व्याख्यातम् १-२-३८ ॥

इति प्रथमाध्यायस्य द्वितीयाह्निकम् ।

---

विषबलेल्पतरे किल जीवनं मरणमेव सुनिश्चितमन्यथा ।
कृतविशेषवशेन कृतः कथं प्रतिविधानमिदं परिभाव्यते ॥ १०३ ॥
अथमिह स्थित एव जगद्गुरुं निखिलवृत्तमवैमि परीक्ष्यताम् ।
इति यदन्धिकतयः सुखनिर्णयं किमपि वन्त जनैः परिपृच्छ्यताम् ॥१०४॥
नतु पुरः परिपश्यसि पुस्तकं मम करे कमलस्य नदुच्यताम् ।
कितव हे कतिथं खलु पृष्ठके तदिह नूनम कथं न्वसि मौनवान् ॥१०५॥
अनुनिरोधविधेः करिणो बलं सकलभूतदयैनावगम्यते ।
इति यदचवधानवतां परं फलमिति स्फुटमाह पतञ्जलिः ॥ १०६ ॥
अवहितस्य फलं जगतो मतं न पुनरस्यवधानवतामपि ।
फलमनुत्तममाप्नुयतां भवेदवहितो महितोत्तमतत्परः ॥ १०७ ॥
इति कितवचरित्रं जानता मानवेन स्फुटमतिशयविचं दृष्टमप्यत्रलोकैः ।
न किल फलमुपेयं व्याहृतं धुंकृतादेरभिमतवरमार्थैः किं नु रम्येदनर्थं ॥१०८॥

इति प्रथमाध्यायस्य द्वितीयाह्निकम् ॥

द्वितीयाध्याये प्रथमाह्निके प्रथमाधिकरणमारभ्यते-

परिच्छिन्नोस्ति वान्याद्दक् सर्वात्मा भगवानयम् ।
स्वापतेयः परिच्छेदः सर्वथास्योपपद्यते ॥ १ ॥
अमामज्ञस्यतः पत्युः स्वयमेवायमोशिता ।
परिच्छेत्तुरभावाच्च नेयत्तास्योपपद्यते ॥ २ ॥

सूत्राणि-आकाशत्वक् सहस्रशीर्षा सर्वात्मा २-१-१ । आकाशः प्रकाशधर्मात्रकाशमात्रगोनन्तः २-१-२ । तस्मिन्त्सागरत्व ह्योपाम्यसंख्यानि विश्वानि २-२-३ । ते त्विन्द्रवो बुद्बुदावा सर्वात्ममहोदधेः २-१-४ । अंशतो ज्ञातमिदमेकम् २-१-५ ॥

वार्त्तिकानि—

(७०१) अनन्तमाकाशमिदं पयोधेर्द्वीपैरिवाम्भो निचितं च विश्वैः ।
एकस्य सत्रात्मतुपाश्रयस्य वस्तूपपत्ते वर्णनमत्र किंचित् ॥ १ ॥
सारायणोपग्रहकेतुजातैः परस्पराकर्षणनिग्रहारैः ।
विचित्रवर्णाकृतिभिः समन्ताद्व्याप्तं त्रिणालं किल विश्वमेतत् ॥ २ ॥
धराभितो वर्तुलकल्परूपा कटम्बकिञ्जल्कनिभाश्च तस्याम् ।
देशेष्वनेकेषु कृताधिवासाः सर्वत्र वं मूर्धि विलोकयन्ति ॥ ३ ॥
आकृष्टिशक्त्याखिललोकभाजा धरातलावृक्षसि खं न किंचित् ।
अधार्यमाणं सलिलानिलाद्यैस्तस्माच्च कस्यापि निपातशङ्का ॥ ४ ॥
भूकेन्द्रपातिस्वमधोनिपातः खमंशुकोला गतिरूर्ध्वगत्वम् ।
अतो धरार्धान्तरचारभाजां निपातशङ्कोर्ध्वगतिस्वबुद्धिः ॥ ५ ॥
प्रकाशधर्मण्यवकाशमात्र-व्याप्तिश्चाकाश उदीर्ष्यमाणे ।
दृष्ट्या स्वया यत्प्रतिहायया वा यद्दीक्ष्यते तस्य विचारणात्र ॥ ६ ॥

द्वितीयाधिकरणमारचयति—

ग्रहादेः पुरुषाधीनाकृष्ट्यधीनाथवा गतिः ।
स्याद्गतिः पुरुषाधीना रथादौ दर्शनात्तथा ॥ १ ॥
जलादाघन्यथा दृष्टेर्न गतिः पुमपेक्षिणी ।
नियम्ये चेतनापेक्षा नियतेस्त्वनपेक्षता ॥ २ ॥

सूत्राणि—तस्मिंश्छायापथताराग्रहोपग्रहकेतवः प्रधानानि प्रमेयस्थानानि २-१-६ । स्वाधाराः परस्पराकृष्टिनिघ्नचाराः सर्वे २-१-७ । आकृष्टिर्मानानुलोमा विप्रकर्षप्रतिलोमा च २-१-८ ॥

तृतीयाधिकरणमारचयति—

छायापथादयः सर्वे गतिमन्तोन्यथाथ वा ।
मूर्गतेर्गतिभानं स्याद्गतिष्वप्यमोघलम् ॥ १ ॥

( श्र० २ ) मानानुलोमा किल विप्रकर्षप्रतीपाकर्षणशक्तिरत्र ।
स सर्वगा सर्वगतिस्थितीनां निमित्तमेवेति वदन्ति सन्तः ॥ ७ ॥
( श्र० ३ ) स्फुरत्प्रभः फेनचयावभासश्छायापथो दूरतमः पृथिव्याः ।
दृश्यः क्व चित्तारकितः परत्र सिताभसंघातनिभः प्रसिद्धः ॥ ८ ॥
शुभ्राभकार्ष्ण्योपमितः प्रवेष्ट्या तारादिकं ज्योति विभासमानः ।
छायापथोयं विपुलोस्ति साध्यावस्थास्थितो दृश्यवपुश्चरत्रः ॥ ९ ॥
घनोभवद्वाष्पचयादमुष्मात्कालेन तारात्मिकरो विजज्ञे ।
मतो ग्रहोपग्रहवर्ग आमीदुत्पेक्षितं केश्चिदिदं सुधीभिः ॥ १० ॥
स्वयंप्रकाशा निरपेक्षचाराः सूर्या असंख्या निजमण्डलस्थ ।
केन्द्रस्वरूपा विचरन्ति तेषां तारास्यया सर्वजने प्रसिद्धिः ॥ ११ ॥

आकृष्टेरनिवार्यत्वात्सर्वेषि गतिशालिनः ।
परिवृत्तिर्ध्रुवापेक्षा ध्रुवागमनहेतुका ॥ २ ॥

सूत्राणि—छायापथोऽतिविप्रकृष्टः २-१-९ । तस्मिंस्ततः पृथक् ष सूर्याः सूर्यैतरानिघ्नचारास्ताराख्याः २-१-१० । सूर्यस्तारेत्यनर्थान्तरम् २-१-११ । तद्वर्गाः सप्तर्षिप्रभृतयः २-१-१२ । सर्वे सगतिकाः २-१-१३ ॥

---

जघन्यैरन्तोऽपि विहायसोमे सापप्रकर्षात्प्रचुरप्रकाशाः ।
स्थिरा ध्रुवेत्युक्त उदीर्णवेगाः पोता ध्रुवाभस्यतिविप्रकर्षात् ॥ १२ ॥
तेषां धरायां प्रतिसंनिकृष्टस्तापप्रदोयं किल सूर्य एकः ।
अन्ये तु सूर्या अतिविप्रकृष्टाः स्फुरन्ति रात्रौ दिवमे त्यदृश्याः ॥ १३ ॥
श्वेतारुणश्यामलपीतधूम्र-नीलादिवर्णा ग्रहयोत्र ताराः ।
कांश्चित्पृथक्चारभतः परान्तु संब्रह्मचारा. सुधियां प्रसिद्धाः ॥ १४ ॥
विद्युत्सु तारानिकरस्य वर्गाः सप्तर्षिमुख्याः प्रथिता अनेके ।
उर्ध्वक्रमेणैव मुखेन तासां विज्ञेयचित्रार्चिरिधः सुसाधः ॥ १५ ॥

तत्कर्णिशुमारशिफाः सुमेरुनविधेऽङ्गगतिवृत्ते ।
घोणाजानुगमुकुटं ऋक्षऋक्षयुगर्क्षयो धनेातुश्च ॥ १६ ॥
त्रिशङ्कुमेलऋश्यप-गोधाहंसाः शिखा परे वृत्ते ।
गरुडनरेन्द्रभुजङ्गाः कपिमुण्डः सिंहशावकः सूनः ॥ १७ ॥
पर्णुत्रिकोणढोला वाज्यश्वतरी तिमिर्बाणः ।
एते सूर्योपवृत्ते चतुर्थवृत्ते तु राशयः प्रथिताः ॥ १८ ॥
सरटहृदाश्विचटिकाः सुवर्णयष्टिः कपोतश्च ।
पोतशलाकाष्टासं कुमेरुसविधेऽङ्गगतिवृत्ते ॥ १९ ॥

चतुर्थाधिकरणमारचयति—

ताराणां स्वप्रकाशत्वं रविभास्यत्वमस्ति वा ।
तापस्यानुपलम्भात्ता रविभास्या ग्रहादिवत् ॥ १ ॥
स्वप्रकाशा इमे सूर्यास्ताराख्यास्तममण्डलाः ।
रवितोऽप्यतिदूरत्वान्नामां तापोनुभूयते ॥ २ ॥

सूत्राणि—भूमेः संनिकृष्टतमस्तापदः सूर्योयमेकः २-१-१४ ।
तस्य मध्यमो भूविप्रकर्षः कोटिः सांघ्रचष्टलक्षा २-१-१५ ।
प्रभाया विकलया संचारः सांघ्रित्रयोविंशतिसहस्राणि २-१-१६ ।

वृत्तत्र्यस्रमयूराश्चतुरस्रं पंक्तिका सरिच्च शशिः ।
गुनकास्त्रिशङ्कुमुक्ता मुरजो धनुश्च द्विनोपयुते तु ॥ २० ॥
महिषवृकवेदिदूरत्वणकोटीराणि सिन्धुश्च ।
मृदंगवणमपि सारस-शकुनौ टङ्कस्तिमिंगिलो व्याधः ॥ २१ ॥
शङ्खो वज्रशिशुः शेषपञ्चमसः काकस्तूर्णायुनागताः ।
ज्योतिर्गणिताभिज्ञैरिति तारायोगमदो दर्शितः ॥ २२ ॥
( अ० ४ ) सांड्घ्रचष्टलक्षान्वितकोटिमानो रवेर्भुवो मध्यमविप्रकर्षः ।
ततः प्रभायाति धरां कलाभिरष्टात्मकाभिर्मनुनांयतेन ॥ २३ ॥
सांड्घ्रित्रयोविंशतिसंमितानि प्रभा सहस्राणि तु योजनानाम् ।
कालेन सैषा विकलात्मकेन चात्युद्गमेन क्षयेन युक्ता ॥ २४ ॥
शङ्कुद्रयादप्यतिविप्रकृष्टास्तारा भुवो या अतिसंनिकृष्टाः ।
लक्षार्धपंचैरतिविप्रकृष्टास्त्वमेति तारानिकरादिहास्मान् ॥ २५ ॥
तद्विप्रकर्षातिशयाच्च तापः प्रभा परं भूमिमुपैति साध्यः ।
ज्ञातश्च सूर्यस्य ततो यदाद्या न तारकाणामतिविप्रकर्षात् ॥ २६ ॥

शांकुछयाधिकः संनिकृष्टतमताराविप्रकर्षः २-१-१७। अतिविप्रकृष्टेभ्योर्धलक्षण भूप्राप्तिर्विप्रकर्षमवगमयति २-१-१८। तस्माच्चेभ्यः प्रभामात्रागमो न तापाधिगमः २-१-१९। सूर्यस्यास्य ग्रहादयो ज्ञाताः संनिकर्षान्नान्येषामतिविप्रकर्षात् २-१-२०।

पञ्चमाधिकरणमारचयति—

ग्रहैः सह रविः पृथ्वीं परिगच्छति वा न वा।
परिगच्छन्नविदृष्टः काम्या स्यात्तत्र कल्पना ॥ १ ॥
महीग्रहो ग्रहैरन्यः सह पर्येति भास्करम्।
अयनर्तुपरागादि सर्वमित्थं समञ्जसम् ॥ २ ॥

---

( अ० ५ ) भूर्यः प्रमिद्धो निरपेक्षचारस्तारविग्रचारा ग्रहनामभाजः।
उपग्रहास्तु यत्संनिधचारा यथाः सपुच्छा इह केतुसंज्ञाः ॥ २७ ॥
बुधकक्षाश्रितभोमबृहस्पतीऽर्कानिमथाप्युरणं वरुणं तथा।
त्रिदूरिहाष्ट रवेर्महेतो यथानुपसहस्रलघुग्रहसंयुतान् ॥ २८ ॥
शून्ये त्रये तद्दृगुणेषु चेद्वे चतुर्युतेषु ग्रहविप्रकर्षः।
तं प्रायिकं केचिदुदाहरन्ति न विप्रकर्षो नियमेन यस्मात् ॥ २९ ॥
द्वासप्तत्या युक्ता त्रिशती व्यासो बुधस्य संकलितः।
योजनचतुष्टयं कियदूनं कक्षागतेर्वेगः ॥ ३० ॥
साधं लक्षचतुष्टमस्य रवेर्मध्यमन्तरं प्रोक्तम्।
प्रायोष्टाशीत्याहुः सूर्यं परितः परिभ्रमणम् ॥ ३१ ॥
शुक्रस्यार्धशतोनं साधंत्रियुतं सहस्रकं व्यासः।
अङ्क्य पूनयोजनत्रयमस्य च कक्षागतेर्वेगः ॥ ३२ ॥
सप्तत्यूनं प्रयुताष्टकं पुनः साष्टसहस्रम्।
सार्धशतपञ्चयुक्तं रवितः शुक्रस्य मध्यमन्तरं प्रोक्तम् ॥ ३३ ॥
प्रायः सपञ्चत्रिंशति·दिनशतयुग्मेन तु भ्रमणम्।
शुक्रस्य तत्त्वमित्थं ज्योतिर्विदभिर्निर्णीतम् ॥ ३४ ॥

सूत्राणि—सूर्याधीनचारा ग्रहा लघवो महान्तश्च तं परियन्ति २-१-२१ । ईदृशचारादयनर्तुपरागादि २-१-२२ । महान्तोष्टौ बुधः शुक्रो भूमिर्भौमो जीवः शनिरुणो वरुणश्च २-१-२३ । क्रमतो वर्धमानायामास्तत्कक्षा दीर्घवृत्ताकाराः २-१-२४। सूर्यः केन्द्रोन्यतरः २-१-२५। भौमजीवयोर्मध्ये लघुग्रहाः परःशताः शचीरमाद्याः २-१-२६ ॥

षष्ठाधिकरणमारभ्यते—

केतवो विविधाकाराः सौरा आगन्तवोपि वा ।
निश्चिता न गतिस्तेषां तस्मादागन्तवस्त्वमी ॥ १ ।

---

सार्धदशोनसप्तं भूमेर्व्यासोत्र संकलितः ।
प्रायः शुक्रसमानस्तस्याः कक्षागतेर्वेगः ॥ ३५ ॥
साऽष्टनवयुक्ता कोटिर्मध्यान्तरं रवितः ।
प्राय सप्तत्यष्टि-त्रिशतद्विनैस्तत्परिभ्रमणम् ॥ ३६ ॥
अर्धसप्तं सप्तार्धोनिसचत्वारिंशदन्वितं व्यासः ।
भौमस्य कोटिरूनं द्वितयं कक्षागतेर्वेगः ॥ ३७ ॥
कोटिः सप्तयुतानि सप्तनवागयुतमेकम् ।
साऽष्टशतनवकसहितं सप्तसयुग्मं च मध्यमन्तरं रवितः ॥ ३८ ॥
सप्तार्धोनिसमन्वित द्विनशतनवकेन तत्परिभ्रमणम् ।
भौमग्रहस्य तत्त्व तदिदं ज्योतिर्विदाभिष्टम ॥ ३९ ॥
सार्धद्वयोनियुक्तं सप्तशताढ्यं किलायुतं व्यासः ।
जीवस्य योजनमितः कलितः कक्षागतेर्वेगः ॥ ४० ॥
सचतुर्नवं साष्टायुतं सहस्रान्वितं गतेः परिध. ।
साऽष्टशभिरूपेतमन्तरमस्य चतुर्भिः सहस्रैस्तु ॥ ४१ ॥
सार्धद्वात्रिंशद्युत-शतत्रयाढ्यं दिनैः परिभ्रमणम् ।
जीवग्रहस्य तत्त्वं ग्रहवेदिभिरिति विनिर्णीतम् ॥ ४२ ॥

केचिन्निर्णीनगतय इतरेन्याहशा अपि ।
केचिद्गन्तव: केचित्सौरा इति विनिर्णय: ॥ २

---

शतनवकं नवमहितं व्यमस्तु गतियुतस्य संकलितः ।
योजनचरणाश्चितयं कक्षागतिवेग गतस्य ॥ ४३ ॥
एकादशकोट्योष्टभिराढ्या लक्षैस्तथाष्टभिस्त्वयुतैः ।
सवरणमहस्रमग्रोपेता मध्यान्तरं रवितः ॥ ४४ ॥
षष्ट्याढ्यमप्तगतयुतमयुतं भमणास्य कालोद्धाम् ।
दृतिर्गानलब्धं गणिताचार्यैर्निरणायस्य स्पष्टम् ॥ ४५ ॥
"उरगस्य नवाढ्यगतोपेतो व्यासश्चतुः सहस्रमितः ।
प्रायोध्व योजनमितः कलिसः कक्षागतेर्वेगः ॥ ४६ ॥
सत्रिगुणा द्वात्रिंशतिकोट्योयुतनवकयुक्ताः ।
सार्धमहस्रं पेता रविता मध्यान्तरं तस्य ॥ ४७ ॥
त्र्यंशोनित्रिचषड्गोत्या युक्तैः शतपञ्चकाब्धिश्च ।
त्रिंशत्सहस्रविहतैः सूर्यं परितः परिभ्रमणम् ॥ ४८ ॥
षट्त्रिंशत्यन्वित सप्तशताढ्यं सहस्रकृतियम् ।
मध्यं यमणास्य व्यासो वेगस्तु योजनत्रयः ॥ ४९ ॥
कोट्यस्तु चतुस्त्रिंशत्ययुतानि नवैव पञ्च लक्षाणि ॥
षट्सहस्रमेत'युतषट्काब्धानि चान्तरं रवितः ॥ ५० ॥
मध्यंशटुयमप्तगोतियुतैः षट्सहस्रविहतैः ।
सूर्यं परितो भमणं यमणास्यो क्तं विपश्चद्भिः ॥ ५१ ॥
० ६ ) यदा प्रभाऽच्छभतोऽतिदीर्घं वृत्तेर्भमन्तः परितः स्यसूर्यम् ।
उल्काः सवन्तः पथि केतुसन्ना: पर:सहस्रा गगने चरन्ति ॥ ५२ ॥
सूर्यान्तरं केऽपि परिभमन्तः सौरेत्र लोके विरलोपलभ्याः ।
परिभमन्तो रविमेतमेत्र प्रायस्त्वनेकत्र भवन्ति दृश्याः ॥ ५३ ॥

सूत्रे—सप्रभापुच्छा अनतिघना अतिदीर्घंतरवृत्तगाः सौरा आगन्तवश्च, केतवः २-१-२७। ते वाष्पीयाश्छायापथांशवत् २-१-२८

सप्तमाधिकरणमारचयति—

चन्द्रोमेरु एवास्ति बहवस्तादृशा उत ।
एकस्यैवोपलम्भेन बहूनां कल्पना कुतः ॥ १ ॥
ग्रहाधीनगमाश्चन्द्रा उपग्रहपरामिधाः ।
दूरवीक्षणदृश्याश्च षड्विंशतिरिह स्थिताः ॥ २ ॥

सूत्र—ग्रहाधीनचारा उपग्रहाश्चन्द्राख्याः २-१-२९। एते भूचरणयोर्द्वौ भौमस्याष्टौ जीवस्य चत्वार उरणस्य दश शनैश्चरस्य दिनाः २-१-३० ॥

अष्टमाधिकरणमारचयति—

भूगर्भे मेरुशृङ्गादौ ग्रहेष्वन्येषु वा क्व चित् ।
स्युर्वा न वा स्वर्निरयाः, स्युरेवोक्ताश्चिरंतनैः ॥ १ ॥

---

( पृ० ७ ) एको भुवो द्वौ च कुजस्य चन्द्रौ वृहस्पतेरष्ट शनेर्दशाऽत्र ।
चत्वार एवोरणकस्य दृष्टा एकोऽथ वाष्पीयपथस्य ॥ ५४ ॥

( पृ० ८ ) नैत्र नाकनिरयादिकास्तिस्तारकादिषु किलोपपद्यते ।
दिव्यदृष्टिगगनाविचिन्तनोऽस्तरणा न च वेत्स्यतपि मा ॥ ५५ ॥
नापि मा विनिरविष्यत स्फुटं तारकादिषु विभज्य मूर्तिभिः ।
कल्पनेयमसमञ्जसा कथि स्यप्रमेयक्रममेति निश्चयः ॥ ५६ ॥
केन्द्रमान्मथमतिपक्ष्य यक्ष्मन्निनादमधस्तनं सदा ।
ये विपत्यथ परं पहादयस्ते तु यथद्रारि प्रसर्पिणः ॥ ५७ ॥

व्यापित्वात्परिणामस्य दुःखादेर्नित्यसंकरात् ।
लोकान्तरेऽमरत्वादि-वर्णना कविकल्पना ॥ २ ॥

सूत्राणि—असदृशेषु निर्दिष्टम् २-१-३१ । एतेषूर्ध्वाधो-भेदः सुखाद्यतिशयश्चकवीनामुत्प्रेक्षा २-१-३२ । तथा पुत्रत्वगुरुत्वयुद्धहेतुत्वादिकल्पना नराकारादिकल्पना च २-१-३३ ॥

नवमाधिकरणमारचयति—

व्यक्ता सर्वेषु लोकेषु भवेज्जीवस्थितिर्न वा ।
तैजसादिभिदायोगाद्व्यक्ता सर्वत्र सा भवेत् ॥ १ ॥
तप्तपिण्डे रविनिभे शीते च शशिना समे ।
व्यक्ता जीवस्थितिर्नैव, शीतोष्णे सा क्षिताविव ॥ २ ॥

अस्तु कस्य तदिहोर्ध्वलोकता कस्य वा पुनरधस्तनी स्थितिः ।
संदधात्यतिशयेनुमीयतां कीदृशः कथमथोर्ध्वचारिषु ॥ ५८ ॥
मङ्गलः क्षितिसुतो ग्रहस्थितिर्नाकनाथकगुरुर्नराकृतिः ।
भूमिसाम्यगुरुतादिहेतुका इत्यमूः कविकुलस्य कल्पनाः ॥ ५९ ॥

(अ० ९) केतुतारकशशिग्रहादिक-व्यक्तपूर्वाजडमिश्रता स्थिता ।
जीवशक्तिरिह तद्भिदानुगा तद्भवास्थितिमिमां विदुर्बुधाः ॥ ६० ॥

अन्तरूष्मसु बहिर्जडास्विह व्यक्तपूर्वसु च जीवसंततिः ।
आद्यतापविगमे हि भूयसः प्राणिनां क्रमविकासमाटधे ॥ ६१ ॥
या महोष्ममयविग्रहाः पुनर्व्यक्तयो रविनिभाश्चरन्ति खे ।
आद्यतापविगमप्रतीक्षिणो जीवशक्तिरधुनाऽसु कल्प्यते ॥ ६२ ॥
याः पुनः शिशिररश्मिशीतलास्ताश्चिराय गतजीवशक्तिकाः ।
प्राणिनां न पुनरेकतः खगात्संक्रमः किल परत्र संगतः ॥ ६३ ॥

सूत्राणि- शीतोष्णोष्णशीतभेदः सर्वत्र २-१-३४ । अवव्यक्तिः शीतोष्णेषु , पृथिव्यामिव २-१-३५ । उष्णेष्वव्यक्ता जीवशक्तिर्यथा सूर्ये २-१-३६ । शीतेषु नष्टा यथा भूमिचन्द्रे २-१-३७ ।

ष्ठमधिकरणमारचयति=

वैज्ञानिकैर्यत्प्रकृतेस्तत्त्वमत्र विनिश्चितम् ।
तत्प्रत्यक्षानुमानाभ्यां शब्दमात्राश्रयेण वा ॥ १ ॥
शब्दमात्राश्रयेण स्यात्पौराणिककथादिवत् ।
नोपपन्नमिदं शब्दो मानं नैवाविधौ यतः ॥ २ ॥

सूत्रं -तदुपलम्भः प्रत्यक्षानुमानाभ्याम् २-१-३८ । विस्तरो वाङ्मयमहार्णवेऽन्यत्र च २-१-३९ ॥

इति द्वितीयाध्याये प्रथमाह्निकम् ।

---

( अ॰ १० ) अर्थजातमिदमीदृशं चुधैर्हन्तुमंगतमतक्यसाधनैः ।
नव्यतोन्द्रियवपुष्यदर्शिभिर्दिव्यदृग्भिरपरोक्ष्यमर्मभिः ॥ ६४ ॥
कौतुकाय सुधियामयं कियान्दर्शितः प्रकृतितत्त्वसंग्रहः ।
विस्तरार्थिभिरलं वगाह्यतां वाङ्मयार्णवतरङ्गमालिका ॥ ६५ ॥

इति द्वितीयाध्याये प्रथमाह्निकम् ।

# द्वितीयाध्याये द्वितीयाह्निके



प्रथमाधिकरणमारचयति—

अन्वेष्यहेतुः सृष्टिः स्यात्सादिराहो तु शाश्वती ।
सादिः स्यान्निर्मितेशेन नहि किञ्चिदहेतुकम् ॥ १ ॥
सृष्टिवैचित्र्यतः पूर्वार्द्धेऽभ्यान्तरनिःसृतिः ।
सा कीदृगिति विज्ञानं कुतः सेत्यज्ञकौतुकम् ॥ २ ॥

सूत्राणि -शाश्वतं विश्ववैचित्र्यमगम्यबीजं तथा च ऋषिः । २-२-१ । व्यक्तेस्तु सादित्वं सान्तत्वं च । २-२-२ । न कस्मादिति विज्ञानविषयः कीदृगिति सः २ २ ३ ॥

( अ० १ ) शाश्वतो किल जगद्विचित्रता चेतु हेतुमदसौ यमत्रजः ।
आदिमन्तमपि तत्र केवलं व्यक्तयो दधति तद्दुरोदरे ॥ १ ॥
कीदृगत्र ननु तत्त्वमित्थं भाति शास्त्रविषयः परिस्फुटम् ।
सत्यमेतदथ नान्यथा कुतः कस्य तर्कविषयो भवेदसौ ॥ २ ॥
द्राक्षयत्यहिमदीधितिर्हिमं वारि शोषयति चेति दृश्यते ।
नान्यथेह नियमः किमित्थमं के समादधत् वा कुकल्पनाम् ॥ ३ ॥

द्वितीयाधिकरणमारचयति—

क्षीराब्धिरूपणं क्व स्यात्पार्थिवे वा पयोनिधौ ।
वियच्चरे वा कस्मिंश्चित्पार्थिवे स्यात्तथोक्तितः ॥ १ ॥
क्षित्यादिविश्वाधारस्य विष्णोर्यदयमाश्रयः ।
छायापथेतः क्षाराब्धिरस्य विश्वस्य वेष्टनम् ॥ २ ॥

सूत्राणि-सर्वात्मन्यक्षर ओतश्च प्रोतश्चाकाशइति याज्ञवल्क्यः । २-२-४ । तदेतद्विश्वेपार्थिवमद्विष्णुयदं क्षीराब्धिनिभेन च्छायापथेन वेष्टितम् । २-२-५ । छायापथशकलानां वियति भ्रमणं मेघानामिव वायुमण्डले । २-२-६ ॥

तृतीयाधिकरणमारचयति—

ब्रह्मा स्यात्पुंविशेषोवान्यो वा, स्यात्सपुमान्ध्रुवम् ।
कुलालवद्धि सर्वं स निर्मिमते महोद्यमः ॥ १ ॥

(अ० ८) अक्षरात्मनि विश्वच्छदात्मके प्रोतमोतमिति यज्ञवल्क्यजः ।
विश्वमेव विपदाश्रयं स्फुटं याप्यतानखिलविच्छिदा गृहम् ॥ ४ ॥
विश्वमेकमिदमस्मदाश्रयो यद्विपन्नु तदुपाधिकं स्थितम् ।
तस्य विष्णुपदवाच्यना स्फुटं व्यापिता वियति सर्वमंसता ॥ ५ ॥
वेष्टितं च तदनातपाध्वना क्षीरवारिधिनिभेन मर्वतः ।
तप्तखाण्डपटलैरमंख्यकैर्व्याप्तमस्य गगनैरितस्ततः ॥ ६ ॥
(अ० ९) • तप्तेखाण्डपटलाटयेदृगात्सारमण्डमुदभूत्कुतश्चन ।
आत्तमण्डमिति यद्विपश्चितः कीर्तयन्ति महसा हिरण्मयम् ॥ ७ ॥

उद्यन्नरुणपद्मेसौ ब्रह्मा सूर्यो न संशयः ।
हिरण्मयमृताण्डस्य स गर्भः स्वयमुद्बभौ ॥ २ ॥

सूत्राणि-कुतश्चिच्छायापथशकलाद्विष्णुरदे प्रततेजोमयाद्रविकेन्द्रकमिदमण्डम् । २-२-७। हैमं रवितेजसा । २-२-८ । तत्परिच्छिन्नस्य विष्णुरदस्य नाभावरुणपद्माश्रयो रविः। २-२-९। स बृहत्त्वाद्ब्रह्मा प्रयुतार्चिरूर्मिसमः परितस्तेजोमयत्वात्सर्वतोमुखः । २-२-१०। सर्वशक्तिमयेन धाम्ना विश्वसृट् स्वयम्भूः। २-२-११ । अनेके ब्रह्माणोनेकानि च ब्रह्माण्डानि । २-२-१२ प्रतिरोमकूपं सर्वात्मन इति कवयः । २-२-१३ ॥

तद्भभज्यत च यात्यनेहसि प्रादुरास च रविस्तदन्तरे ।
नुद्यतश्च परिधेर्महादयो जन्निरंस्य घियदङ्गणाभया ॥ ८ ॥
इत्यमेव तपनो मतागडजो रश्मिभिश्च किल सर्वतोमुखः ।
एष सैरजगतश्च सर्जनाद्विश्वसृङ्निगदितश्च स स्वभूः ॥ ९ ॥
अप्रमेयसकलात्मपूरुषे रोमकूपसमविश्वमण्डले ।
कत्यमा किल मरीचिमालिनस्तत्प्रमस्य तु परिच्छनत्तु कः ॥ १० ॥
(अ. ४) भज्यमानपरिधावथाण्डके तस्य केन्द्रमभवद्विभाकरः ।
मुच्यते स्म च ततः क्रमाद्ग्रहोपग्रहादिनिकरो नभोङ्गणे ॥ ११ ॥
निःसरत्सु रवितो ग्रहेष्वथ भूग्रहोपि समये विनिर्गतः ।
तप्रबाष्पमयपिण्डतां दधत्प्राणभृत्स्थितिविरोधिनीं चिरम् ॥ १२ ॥
वाष्पवायुमयतेजसः शनैरुष्मनिर्गमभवत्प्रतो घनैः ।
शान्तवारिपरिणामिभिः कृता भूरियं सलिलपूरसंप्लुता ॥ १३ ॥

चतुर्थाधिकरणमारचयति-

य औपनिषदः सर्गस्तस्य वैज्ञानिकाद्विदा ।
समन्वयो वा. भेदः स्याद्भूतादिक्रमभेदतः ॥ १ ॥
वैचित्र्ये शाश्वतेप्यत्र व्यक्तः सर्गक्रमः स्थितः ।
समन्वयश्च तत्रास्ति प्राचां वैज्ञानिकैः सह ॥ २ ॥

सूत्राणि-तदण्डं क्रमाद्व्यभज्यत केन्द्रग्रहोपग्रहादिषूक्ते-
षु । २-२-१४ । ग्रहादिषु तेजसो वाष्पवायोर्वा शनैरूष्मनिर्गमे
पामुद्भवः । २-२ १५ । तद्यदपां शर आसीत्तत्समहन्यत सा
पृथिव्यभवदिति वाजसनेयिनः । २-२-१६ । आन्तरोष्माणौषधयो-
र्युद्भादुद्भेदाः । २-२-१७ । सेयं तप्तकेन्द्राद्दमीभवच्छरा क्रमा-
विर्भवज्जीवविकाशा । २ २ १८ । तस्माद्वा एतस्मादात्मन आ-
काशः संभूत आकाशाद्वायुर्वायोरग्निरग्नेरापोद्भ्यः पृथिवी

---

मान्द्रतां यति च वारिणः शरे पल्वलीभवति मार्गनिर्गमैः ।
व्यज्यमानविनसत्वनोन्नता कामिनीव वसुधा व्यराजत ॥ १४ ॥
आन्तरोष्मपयसोरभूत्यतो भूतरे व्यसिकरो भयङ्करः ।
पावकोपबृहदुद्भिदास्ततो भिन्नरा उदभवन्यतस्ततः ॥ १५ ॥
सेयमुच्चतगिरिस्तना मही मानवीयपरिवेषगुण्ठना ।
प्राप्य वारितरलाम्बरामम्बुधेर्भर्तुरङ्कमकरत्स्वयं वरा ॥ १६ ॥
सप्तकेन्द्रपिटरा शिलास्तरप्रायवारिशरवेष्टनोद्भना ।
भूरभूत्क्रमविकाशशालिभिर्भूरिजीवनिकरैरधाञ्चिता ॥ १७ ॥
इत्थमेव सकलात्मनि स्फुटं सर्ग औपनिषदैरधीरितः ।
स्वानिलाग्निसलिलावनिक्रमादुद्भिदादिपरिणामनिर्भरः ॥ १८ ॥

पृथिव्या ओषधय ओषधिभ्यो भूतानीति तैत्तिरीया: २-२-१६ । सदेव सोम्येदं तत्तेजोऽसृजत तदपोऽसृजत तदन्नमसृजतेति च्छन्दोगा: २ २-२० । अन्नमत्र पृथिवीति बादरायण: । २-२-२१ । एतेनामूलकल्पनोक्तिर्नेव्यानां नराकारोक्तिश्च मध्यमानां निरस्ता २-२-२२ ॥

पञ्चमाधिकरणमारचयति—

महाकल्पादय: प्राचां सार्था यादृच्छिका उत ।
यादृच्छिका: स्युः संबन्धाभावादर्थेरिह स्फुटम् ॥ १ ॥
रवितापादिसंबन्धात् कल्पमन्वन्तरादय: ।
स्वर्थका एव नियतमर्मा ग्राह्या यथायथम् ॥ २ ॥

सूत्रे—रवितापावसानावधि ब्रह्मदिन महाकल्प: । २-२-२३ पृथिव्यां स्वायम्भुवस्वारोचिषवैवस्वताद्या मन्वन्तराख्या: कल्पा: २-२-२५ ॥

---

मर्मभेदनिषदं त्वमूलिकां कल्पनामय नरादिमूर्तिनाम् ।
सृष्टुरत्र किल कल्पयन्ति ये दुर्धियस्त उभयेन धिक्कृता ॥ १९ ॥

(अ. ५) भास्वदूर्ध्वविनयावधि स्फुटं ब्राह्ममेकदिनमुच्यते बुधै: ।
कार्त्तितं तदभिधान्तरं महा-कल्प इत्यपि विपश्चितां वरै: ॥ २० ॥
कल्पजातमघनादघान्तरं मानवान्तरसमाख्ययोदितम् ।
अन्तरं निजगदु: स्वयं भुवो भास्वदण्डसमयस्थितिं भुव: ॥ २१ ॥
स्वप्रकाशपरितप्तगोलकेनान्तरं निगदितं स्वरोचिष: ।
व्याप्तवत्यथ विवस्वदंशुभिर्भूपतेश्च तु विवस्वदन्तरम् ॥ २२ ॥

षष्ठाधिकरणमारचयति—

व्यक्तयोऽत्रावताराः स्युर्जातयो वा झषादयः ।
विशिष्टा व्यक्तयः स्पष्टमवतारा उदीरिताः ॥ १ ॥
सिंहः पशूनामित्यादि-व्यपदेशात्तु जातयः ।
अवतारा गुणैर्योगादेव व्यक्तिषु तद्वचः ॥ २ ॥

सूत्राणि—अवतारा जीवजातयः । २-२-२५ । योग्यतमाव-स्थानाद्विशेषो महाव्यालादीनाम् । २-२-२६ । जनकयोगाद्योग्य-ताधिक्यमुभयोर्धनत्वेवस्थानपक्षे । २-२-२७ ।

(अ ६) प्रादुरास क्रमिर्मीनकच्छपाद्याकृतिक्रमविकासशालिना ।
जीवशक्तिरयत्नेन नरावधिस्तंभजंस्तदवतारतामतः ॥ २३ ॥
यास्तु रेमशगजादयोभयन्यूनजातय एव समासते ।
ता विनेशुरथ योग्यताधिक्यैः पोषिताः किल शरीरिभिष्टात् ॥ २४ ॥
योग्यताधिकतरोचिता सुते योगतो जनकयोर्जनुष्मति ।
पितृकः प्रकृतिजोयवा न चेत्कोपि हेतुरपकर्षको महान् ॥ २५ ॥
शाश्वतो किल जगद्विचित्रता नात्र कार्यमपकर्षहेतुकम् ।
हन्त हेतुभिदयेति दृष्टया संगता विषमता मतां खिला ॥ २६ ॥
पूर्वजन्मपरजन्मकल्पना वैषम्यमिति समञ्जसामपि ।
या समर्थयितुमाश्रिता जनैः सा प्रमादभगवत्कृपा परम् ॥ २७ ॥

सूत्राधिकरणमारभते—

भूः स्थिरा वा सगतिका सा स्थिरैवोपलभ्यते ।
लम्बरेखापगमनान्त्विमाश्रमस्थितिभेदतः ॥ १ ॥
अबाधितानुमानेन भ्रमियं गतिशालिनी ।
निर्णीता स्थितिभानं तु घर्षणादेरभावतः ॥ २ ॥

सूत्राणि—भूरक्षपरिवर्त्तिनी मूर्ये पर्येति ग्रहान्तरवत् । २-२-२८ । गतेरुपपत्तेः । २-२-२९ । घर्षणाभावादन्तादर्शनाच्च गतेरननुभवः । २-२-३० । वाष्पशकटस्थस्य तन्त्रीस्तम्भादीनामिव नक्षत्रादीनां गतिभानम् २-२-३१ । नौदृष्टान्तो वा २-२-३२ ॥

(श्लो० ७) भूमिरक्षपरिवर्त्तनैर्नो रविं क्षायनेन परियाति सर्वदा ।
ईक्षणैर्गो पतगतिर्विनिश्चितो मूरिभिर्पहविदा ध्रुवं स्थितेः ॥ २८ ॥
लम्बरेखापगमाद्यदैकमाक्षुरतो निपतत्स्तम्भयानवत् ।
संगतेश्च गणनासु सर्वथा गौरियं गतिमतीं विदां मता ॥ २९ ॥
घर्षणं न यानेर्विद्यत्यधो नैव निस्तलतयान्तदर्शनम् ।
वेगवत्यपि सतीनुभूयते नैतदीयगतिरम्मसादिभिः ॥ ३० ॥
भाति वाष्पशकटेन गच्छतो नौकया सरित वा वसर्पतः ।
यामसस्फुटगमं तटद्रुम-स्तम्भजातमपि तु प्रतिव्रजत् ॥ ३१ ॥
तद्वदेव नभसि प्रसर्पतां भूपतेन सह नो निजाश्रयः ।
भासते स्थिर इव प्रतिव्रजद्दृश्यते च रवितारकादिकम् ॥ ३२ ॥

अष्टमाधिकरणमारभ्यते—

जलेन प्रलयः किंवा प्रालेयेनाथवा मतः ।
जलेन मध्यमैरुक्तस्तस्मात्स्वोक्तियतां तथा ॥ १ ॥
प्रालेयव्याकृतिः शालातुरीयाद्यैर्यथा कृता ।
भूविद्यावेदिनामिष्टः प्रालेयप्रलयस्ततः ॥ २ ॥

सूत्राणि—मेरुद्वयं दक्षिणोत्तरम् । २-२-३३ । मेरौ प्रालेयनिपातः प्रलयस्तन्निर्वचनात् । २-२-३४ । कृतारम्भः सप्तसागरगिर्यादिलङ्घिनाम् । २-२-३५ ॥

नवमाधिकरणमारभ्यते—

युगव्यवस्था दैव्या वा मानव्या समयापि वा ।
दैव्या स्याद्वैष्णवीयादौ दिव्यशब्दस्य दर्शनात् ॥ १ ॥
मानभिन्नेऽप्यहोरात्रे दिव्यमानुषवर्षयोः ।
अयनद्वितयात्मत्वात्साम्यं वादेऽत्र नोचितः ॥ २ ॥

सूत्राणि—ध्रुवोयमहोरात्रसमं दैवं वर्षम् । २-२-३६ ।

---

( प० ८ ) चतुर्याष्टरिक्त केन्द्रवेधिनी भूतलस्य परिकल्पिता तु या ।
मेरुयुग्ममिति दक्षिणोत्तरं कोर्तितं तदवधिद्वयं बुधैः ॥ ३३ ॥
मेरुमुत्तरमुपाश्रयन्पुराहुर्निशात्मकसमस्तवत्सरम् ।
सुस्थिताः सुचिरमार्यपूर्वजाः कर्षणादिकुशला महौजसः ॥ ३४ ॥
यात्यनेहसि हिमान्युपप्लुता मेरुभूरथ बभूव भीषणा ।
तां विहाय च जनाः पतस्थिरे दक्षिणां दिशमवारितौजसः ॥ ३५ ॥
ये हिमर्तुलयविप्लवंपु तेष्वन्तरर्वि निधनं महागजाः ।
रोमशा उपयपुः सहस्रशस्तेऽत्र यान्ति हृषयतसाम् ॥ ३६ ॥

तदयनद्वयात्मकमनियतदिनसंख्यमत्र ग्रहान्तरेषु च । २-२-३७ । द्वादशसाहस्रे मानवानां चतुर्युगे न दिव्यशब्दः २-२-३८ । दिव्यमानुषयोः समत्वेपि क्वचिद्दिव्यशब्दः प्राक्स्थित्यपेक्षः । २-२-३९ । युगव्यवस्था देशभिन्ना भूतमात्रे न भविष्यति २-२-४० । त्रेताद्वितीयं कृततुरीयं वा तदाग्रहवताम् २-२-४१ ॥

दशमाधिकरणमारभ्यते—

समद्वीपयुताः सप्त स्थिता मध्यादिवार्धयः ।
अन्याहशा वा, सप्त स्युः प्राच्यैरुत्प्रेक्षिता यथा ॥ १ ॥
क्षारस्य संचयाच्छश्वद्वाप्यीभवति वारिणि ।
विसर्गलवणोम्भोधिर्मद्वीपद्वयं त्विह ॥ २ ॥

---

सागराश्च सरितो गिरीस्तथा पर्यटन्नलङ्घ्य शतशः सम ययुः ।
सप्तमिन्युपरिभूषिता भुवो विभुर्ताजस कहार्यपूर्वजाः ॥ ३७ ॥
तेन तेषुगमभूत्कृतात्मनां संमतं क्षितितले कृताध्वगा ।
सत्यमित्यपि मणाकुकल्पनावर्जनाद्विदुरमुष्य चाभिधाम् ॥ ३८ ॥
( अ० ६ ) मेरुमण्डलनिवासिनामहोरात्रतुल्यमयनद्वयं विदुः ।
वत्सरोयनयुगेन संमितस्तत्र नैव नियतस्त्वहर्गणः ॥ ३९ ॥
मेरुवर्षमिदमेव दिव्यमित्युच्यते नरसमासमानसा ।
पार्थिवायनयुगात्मनः स्फुटा त्वस्य हन्त ऋजुचेतसामपि ॥ ४० ॥
पूर्वजानुचरणोद्यतेः क्वचिद्दिव्यवर्षगणना सहाद्भुता ।
स्वोक्तवापि न युगव्यवस्थितावन्तरं घटयितुं क्षमेत सा ॥ ४१ ॥

सूत्रे–अत्र संप्रत्येको नैसर्गिकलावण्यः समुद्गतोपद्रवः सोच्छ्वासचामेकद्वीपोपद्वीपो महार्णव उपाधिभिन्नः २-२-४२। सुरा-द्रिकल्पना वर्णादिहेतुकातिशयोक्तिः पोतादिसागरवत् २-२-४३॥

इति द्वितीयाध्यायस्य द्वितीयाह्निकम्।

---

दिव्यमानुषभितामयास्य सन्त्यामर्षोपसृताश्च धर्म्म च।
स्वीकृता युगचतुष्टयास्थितिर्नाट्य संघटयितुं कथं क्षमा॥ ४२॥
भूतमाचक्षिवया युगास्थितेः किं स एव नियमो भविष्यति।
वेशभेद मिह साप्यपेक्षते नैकरूपसुखदुःखता भुवाम्॥ ४३॥
सार्वकालिकयुगव्यवस्थितेरेकदेशविषयेण्यथाग्रहे।
तुर्य एव चरणः कृतस्य वा त्रेत एव किमु वाटिमात्यरः॥ ४४॥
द्वादशाब्दसमुतार्धमत्र यत्साध्यते समुदयात्कलेर्गतम्।
द्वादशादिमशतान्यतः कलेः सत्यमेव तु युगं ततः परम्॥ ४५॥
ह्रास एकचरणक्रमाद्यथा वृद्धिरप्यथ नयेन संमता।
द्वापरात्कलियुगद्वयोसमात्त्रेतयेत्र परमर्षितं ततः॥ ४६॥
त्रेतयात्र कृतसंनिधौ स्थितौ सर्वतः शुभकृतेः पदत्रयम्।
दुष्कृतेश्चरण एक एव हठाद्धारते निपतितः प्रमाटनि॥ ४७॥

(अ० १०) एवमत्र युगसंज्ञानसत्कृतौ त्रेतया विहितसंनिधौ स्थितौ।
एक एव चरणः कलेर्गतः पाथसां पतिरुपाधिभेदवान्॥ ४८॥

पंचकत्रितयमम्बु भूतले वर्षते स्थलमथैकशोऽशकः।
द्वीपयुग्मकमिह स्थितं महत्क्षुद्रभूर्धरनिधिन्दुसंयुतम्॥ ४९॥
सुरार्णवाटेः परिकल्पना तु या परिस्फुटात्युक्तिरियं चिरंतनी।
सिक्तारेणुश्यामलतादि वारिधावुपाधिजं भात्यवलंब्य कल्पिता॥५०॥

इति द्वितीयाध्यायस्य द्वितीयाह्निकम्।

तृतीयाध्याये प्रथमाह्निके पञ्चमाधिकरणमारभ्यते—

ज्ञानं कर्म च भक्तिश्च समुच्चेयान्यथो न वा ।
परस्परविरुद्धत्वान्न स्यात्तेषां समुच्चयः ॥ १ ॥
अन्योन्यसहकारित्वाच्छ्रेयांस्तेषां समुच्चयः ।
न पारमार्थिकस्तेषां विरोधं कञ्चिदीक्षते ॥ २ ॥

सूत्राणि-कर्मेत्येके ३-१-१ । ज्ञानमेव भिक्षवः ३-१-२ ॥
किंतृतीयं तदुभयं तु मनसोभयात्मकत्वात् ३-१-३ ॥

द्वितीयाधिकरणमारभ्यते—

पितृत्वाद्येव बीजं स्याद्भक्तेर्लिप्सार्थवा परा ।
भक्तिर्बाह्यफलाधीना सर्वं लाभेच्छया यतः ॥ १ ॥

(अ० १ ) न केवलं कर्म पुमर्थं इष्यते जडेपि ज्ञाप्यानसि तृप्यते हि तत् ।
अकर्म च ज्ञानमसंभवं द्वयो न चेनसस्त्यात्मन इष्टतुष्टये ॥ १ ॥
इतीष्यते चेतसि बुद्धिवेदना-क्रियात्मके भक्तियुतेव सा द्वयी ।
त्रिवर्गसिद्धिस्त्वतथानुकूल्यतो ममत्वनाशादमतात्मिका ध्रुवम् ॥ २ ॥
त्रिवर्गसिद्धिश्चेतसि बुद्धिवेदना-क्रियात्मके नैकसमावलम्बिनः ।
त्रयं हि तैलाग्निदशोपमं यतः सहायतामेति परस्परस्य तत् । ३ ॥
त्रिवर्गसं वेदनया नयात्मिगः क्रियान्यता प्रवापदर्शोष्टतं परम् ।
अतद्द्वयं ज्ञानमविद्यया समं त्रयी पुमर्थोभिमतः सदुद्भवे ॥ ४ ॥
ममत्वमास्कन्द्य सती तु विद्यया चरंश्च भक्त्या किल कर्म निर्ममम् ।
उपैति सिद्धिं जनकादिसत्तरां विपर्यये दुर्गतिरेव केवलम् ॥ ५ ॥

(अ० २ ) मृषे जनन्यां जनके गुरौ तथा परेपि वा येषसि कोपि योद्भुतः ।
दृष्टेक्षणम्योतिषयः स केवलं नरेषु भक्तेरिह बीजमुच्यते ॥ ६ ॥

मक्तेर्बीजं पितृत्वादि बाह्यहेत्वनपेक्षणात् ।
यद्बाह्यफलसापेक्षं तद्वाणिज्यं स्फुटं मतम् ॥ २ ॥

सूत्राणि–भक्तिर्धौत्सल्यमद्भुतोत्कर्षापेक्षमहेतुकाराधनपर्यव
सायि २-१-४ । उपकारः परीक्षितः प्रतीक्षितोवा सर्वात्मन
शरीरविशेषस्य वा स उत्कर्षः ३-१-५ । सत्त्वविकाशाश्रैसर्गि
तत्प्रतिभानम् ३-१-६ । ज्ञानाङ्कुरमात्रसहभाविनी सर्वजनी ३-१-
सर्वमाभासमात्रं तामन्तरेण ३-१-८ । न सा बाह्यसौन्दर्यसुखा
द्यपेक्षिणी ३-१-९ ॥

---

पलायत्सु पशुरान्म्लेच्छैर्भिन्नं सिद्धधूर्तेषु सु भक्तिमान्मनेत् ।
अमीषु भक्त्या स्वजने हि सादृण्यं पत्यशक्यं निरये विपन्नये ॥ ७ ॥
दर्यं क्षितिः क्रन्दति मांसवृक्षकैः पलाधिता सिद्धविशेषनामभिः ।
न शिल्पशास्त्रप्रणया विपश्चितः समाद्रियन्ते किल तैस्तिरस्कृताः ॥८
भुक्तुंसभक्ता विनयन्य शत्रवः सदैव पश्चात्कृतशास्त्रशिल्पकाः ।
विद्रूपयन्तस्तनयान्कुटुम्बिनां चरन्ति सिद्धा विगतत्रपा भुवि ॥ ९ ॥
समेत्य वा पण्यविलासिनीजनैरधापि धूर्तैः किल सिद्धनामभिः ।
अयं पुरा खेटयतीति जायतां निरस्य शङ्कां तनयं प्रपुण्यतेः ॥ १० ॥
अहेतुकं सेवनमाचरत्परं यमेण पित्रोः समुपैति निष्कृतिम् ।
सहेतुका नैव हि भक्तिरिष्यते ध्रुवं वणिज्याघटनैव सा हंति ॥११॥
जनो न पित्राटिषु भक्तिसिद्धये कदापि सिद्धस्य वचांस्यपेक्षते ।
धूर्तैर्गृहीतुं पतिदेवतालयं विटं न वेश्यागणिकामेति रात्रिषु ॥ १२ ॥
निरस्य तन्द्रामविभिः कृतानि वेधिगम्य शास्त्राणि महौजसः सुताः ।
अदीयदेहाभपशार्थं मूल्यया परीक्षया योजितया पदे पदे ॥ १३ ॥

तृतीयाधिकरणमारभ्यते -

भक्त्योपकारो ज्ञानस्य धर्मस्य च भवेन्न वा ।

भक्तस्य समयाभावाद्भक्त्या स्याच्चाश एतयोः ॥ १ ॥

सत्त्वोद्रेकात्परा भक्तिः सत्त्वं च ज्ञानधर्मयोः ।

सहकारकमित्यस्माद्भक्तिस्तदुपकारिणी ॥ २ ॥

सूत्रम्-ज्ञानधर्मसहकारिणी सत्त्वोद्रेकात् ३-१-१० ।

---

समाहृतार्थैर्विनयेन सर्वतः पञ्चन्यजातेः परिपूरयन्ति ते ।

विशोधयन्त्यार्षपथं न दुर्धियः पुरातनानां स्तुतिगानतत्पराः ॥ १४ ॥

कर्मादृशोये ननु पारमार्थिकैः सदैव भक्तिः पितृषु प्रशस्यते ।

तिरस्य सां सिद्धिविभूतिनोनुपा मरीचिपानेरिह खेटपेट्टकन् ॥१५॥

न भक्तिर्भोजं किल शास्त्रमीदृशं मतं पितृत्यादि हि तत्कृतात्मनाम्

परीक्षया दोषविनिश्चयेऽप्यतश्चिरन्तनानामपहीयते न सा ॥ १६ ॥

अकर्मण्यं जडमन्धमुद्धतं पतिं निजं या जनकं निषेवते ।

कुलस्त्रियोकाटि यथा तथा यथं स्वपूर्वजत्वेन चिरन्तनाशुमः ॥ १७ ॥

ऋणांस्तु भक्तोऽपि यथाविधानतोऽनुगोः पितुर्या विदधं विदारयेत् ।

चिरन्तनानामपि निष्ठुरस्तया परोक्षको दोषमुतस्यति ध्रुवम् ॥ १८ ॥

अमेरिकीयेन महात्मभिः स्वयं विपश्चरैः ख्यापितसिद्धवैभवान् ।

चिरन्तनान्सिद्धतया निषेवितुं यतामहे शुष्कगुणस्तवोत्सुकः ॥ १९ ॥

यथा तु सभ्याः पितरः कृतोद्यमाः स्वकालिकानां विदुषां धुरि स्थिताः ।

तथात्र विज्ञानविदां धुरीणतां स्वग्रन्थुसाया घटयेम यत्नतः ॥ २० ॥

धृतिं भजेद्रावणपुष्पकस्तवैर्मनागनार्यः किल रावणाङ्गजः ।

कृतार्यसंज्ञाः पुनरात्मनः श्रमेर्नवं नवं निर्ममतेऽत्र पुष्पकम् ॥ २१ ॥

चतुर्थाधिकरणमारचयति-

भक्तो वाञ्छं भजन्दुःखं भक्तिं मुञ्चति वा नवा ।
अयोपि मार्दवं तापे याति भक्तोप्यभक्तताम् ॥ १ ॥

न धृतगोमायुमुखाननेऽञ्जने सुदारुणे सिद्धविभूतिगह्वरे ।
निपत्य विज्ञानपराङ्मुखा मुखं जनङ्कुषेम स्वकुलस्य दुर्यशेः ॥ २२ ॥
अविज्ञताहङ्कारगर्तमाधिताम्बिलोक्य नस्तत्र चिरस्थितिं हृदा ।
दिदृक्षवाणाः किलवाः स्तुवन्त्यमो परेषु च स्वेषु च दिव्यशक्तिताम् ॥२३॥
(पा० ३) न सन्तमन्त्राभिषवाकृतैर्विभूतिमापुर्मघनीयविक्रमाः ।
उपास्य विज्ञानमयो सु वास्तवं पुरापि सिद्धारभजन्महाद्भुताः ॥२४॥
न योगिगम्येयमसेर्हिमाद्रिजैर्न चापि निःश्वासनिरोधविभ्रमैः ।
जनश्चिरं प्राणिति यन्त तगडुज्ञानपेक्षने जाठरबह्निशान्तये ॥ २५ ॥
तितृक्षुलं भक्तिमहेतुकां भजन्प्रमादशून्यो विधिजासमाचरत् ।
परीक्षमाणश्च पदे पदे क्लेशनिहार्यमादानुदयं जनो भजेत् ॥ २६ ॥
कथासु वेधोपजनप्रियासु वा शिवाशसंबन्धमनोरमासु वा ।
विपञ्चरोपानदुपाधिसासु या सुधीः कथांस्यामिह कर्तुमर्हति ॥ २७ ॥
समाधिमूर्च्छाकृपणे स्वने मया न चापि जातिस्मरताभिके विदुः ।
न वा विपञ्चारविडम्बनाविधे जनस्य भक्तिः कुशलं विधास्यति ॥ २८ ॥
यथा वृणां शन्त निकृतनाभिको विनाभिकत्वाय मुहुर्विचेष्टते ।
तथा परेषां किलवैः प्रतारिनः प्रतारणायै यतते पुनः पुनः ॥ २९ ॥
यथो विरञ्चाद्रजसः सनन्दयाः पिबन्ति मातुः प्रणयार्द्रचेतसः ।
भजन्ति नेथोन्सुकतां सुधाघटं सुरानयस्ये कविभिः प्रकल्पितं ॥ ३० ॥
तथैव विज्ञानमयं पिबन्सुधीः सरस्वतीमस्तमनन्यमानसः ।
विभूतिविस्मारविपन्नमाणिनां-मधुद्रवेणेव विनोति भारतम् ॥ ३१ ॥ ॥

भक्त्या सह महद्दुःखं सुखं भक्तस्य संमतम् ।
तां विनां न सुखं किञ्चिन्नातो भक्तिं स मुञ्चति ॥ २ ॥

सूत्रम्-निरवधि दुःखं तया सह सुखं सुखावधिस्तां विना दुःखम् ३-१-११ ॥

पञ्चममधिकरणमारचयति-

पित्रादिविरहार्तस्य स्याद्भक्तेः संक्रमो नवा ।
पित्रादीनां विनाशे स्यात्सिद्धादौ भक्तिसंक्रमः ॥ १ ॥
विरहाख्यां महाभक्तिं वहन्हन्त कथं सुधीः ।
धूर्तं संक्रमयेद्भक्तिं तस्मात्स्यान्नैव संक्रमः ॥ २ ॥

सूत्रम्-भक्तिविरहो महाभक्तिः ३-१-१२ ॥

---

शिशुर्मृन्मूर्तिः फणिफेनबिन्दुना क्रमेण मात्रापरिवर्धनादथा ।
विषस्य विषद्राक्षफलेक्षणं तान्मुहूर्तेनैव्युत्सहते न जीवितुम् ॥ ३२ ॥
तथा महाक्षत्रपराङ्मुखा. क्रमात्पतार्यमाणा किल धर्मकञ्चुकैः ।
विभूतिसिद्ध्यादिमषाकुकल्पना-विषक्षयार्तं खलु मन्तुमीशते ॥ ३३ ॥
( ब ४) सुखं महद्दुःखसमं ध्रुवं मतं विनेश भक्तिं खलु पारमार्थिकीम् ।
सहानया दुःखमपारमुत्तमाः सुखप्रकर्षेण समं पुनर्विदुः ॥ ३४ ॥
(ब.५) वृणां जनन्यादिषु भक्तिरुत्तमा प्रकीर्तिता सा यदि नैव संभवेत् ।
असंनिधानाद्विषयस्य वान्यथा तदावृतेर्दुर्विरहाम्बुधौ सुखम् ॥ ३५ ॥
न सिद्धपूर्तेषु तु भक्तिमात्मनो मनस्विनः संक्रमयन्ति कर्हिचित् ।
निवेशयन्ति प्रणयं महारथास्तुरङ्गयोग्यं न खले खराधमे ॥ ३६ ॥

षष्ठाधिकरणमारचयति-

विषया नृपपित्राद्या भक्तेः सिद्धादयोपि वा ।
सिद्धादयोपि किं न स्युर्महात्मानो हि ते मताः ॥ १ ॥
विषया नृपपित्राद्याः किं सिद्धैर्वञ्चकैरिह ।
अतो न सिद्धेषु जनो भक्तिं कुर्वीत धर्मवित् ॥ २ ॥
सूत्रे-विषयाधिकारिभेदादनेकधा ३-१-१३ । मातापितृगुरु-
नृपदेवाद्यास्तद्विषयाः ३-१-१४ ॥

---

(ष ६) जनस्य पित्रोरथवा प्रजेश्वरे तथा निजेष्वापवितर्यपि स्फुटम् ।
निसर्गजा भक्तिरनन्यगामिनी न सिद्धभूमेषु विभूतिवादिषु ॥ ३७ ॥
न मूर्खधूर्ताटिमहोलचिह्नणोस्तमोमयं यस्य शिवोर्मनो भवेत् ।
कथं स नैसर्गिकभक्तिमस्मरन्त्विभूतिवाढेषु मुधा निमज्ज्यति ॥ ३८ ॥
विटान्महाडम्भरान्वकवतालशठान्बलक्षाभिजनेषु कर्मसु ।
प्रसारकानुद्भटधर्मकञ्चुकान्समृद्धिकामो वचमापि नार्चयेत् ॥ ३९ ॥
स्मरन्भृगोर्कान्कमिलीढृशां हृदा न सिद्धभूतोष सदर्चकांस्त्यजा ।
नरानुगच्छेश्वरकं न कामयेदिहैव सद्यो यदि मोक्षविप्लवः ॥ ४० ॥
जगद्धितेच्छुर्नरदेव्यया जनान्सुविद्यया वर्धयसे महामतीन् ।
निवेशसे शास्त्रपरांश्च भास्वुको न सिद्धभूतांश्छलसिभारसंनिभान् ॥ ४१ ॥
यथा स्फुलिङ्गस्य परोक्षया शुचेरमेयक्रत्व मिखिलस्य जानते ।
परोक्ष्य शब्दादि निजं सयेयते ततोवगन्तुं लघिमाद्यसंभवम् ॥ ४२ ॥
न मेचकत्वं दहनस्य जातुचिद्य वासुराधाद्विपति प्रसर्पणम् ।
नरस्य नैवामरता न च ध्रुवे. सुवर्णवस्त्वारगजन्मदातृता ॥ ४३ ॥
चिरत्नशब्दादिह दिव्यदृष्टिता प्रमाणता तस्य च दिव्यदृष्टिसः ।
इतीदृशे द्वन्द्व परस्परार्थये चिरत्नवादानुरुरीकरोतु कः ॥ ४४ ॥

सप्तमाधिकरणमारचयति-

अधिकारः सुताद्दीनां हैतुकानांमथापि वा ।
हैतुकानां भवेद्भक्तावधिकारः परैः सह ॥ १ ॥

पु: भक्तियज्ञो मतस्तत्र वणिजां नाधिकारिता ।
हैतुका वणिजो नूनं स्वपुण्यपणनोद्यताः ॥ २ ॥

सूत्राणि-सत्त्वोद्रेकवन्तः पुत्राद्या अधिकारिणः ३-१-१५ । हैतुकास्तदाराधकाश्चानधिकृता महाप्रमादादिदोषग्रस्तत्वात् ३-१-१६ । प्रमादादिर्ज्ञानाङ्कुरानन्तो भक्त्यादिविरोधी ३-१-१७ । अहैतुकेप्याराधने दृष्ट्यदोषाद्विषयाधिकारिणोर्निःश्रेयसम् ३-१-१८ सहैतुकाराधने दृष्टिदोषादुभयोर्विनिपातः ३-१-१९ । शम्भली-गृहीतया प्रमदयेव प्रमादवत्या ३-१-२० ॥

यथौषधाख्यामपि कर्णगोचरे व्रजार्द्रितो न शमने शतैरपि ।
-- विभूतिलुब्धो व्यथते तथा मुहुः पुतिं प्रयाते परमार्थनामनि ॥ ४५ ॥
(अ. ७) अवस्य सत्त्वाभिजनेधिकारिता मताच्च भक्तौ न तु तद्विपर्यये ।
अदुष्टदृष्टेरिव सुखाय चन्द्रिका विदूषितात्मस्य तु निष्फलैव सा ॥ ४६ ॥
विघ्नान्नेष्वप्रयतनेषु या जनो विभूतिसिद्ध्याद्यवकल्प्य भक्तिमान् ।
अभक्तिमानेव वणिक्स हैतुकः पणायितुं वाञ्छति विषाणमिच्छति ॥ ४७ ॥
अहैतुका भक्तिरनुष्ठिता ध्रुवं समस्तकल्याणमयी सतां मता ।
अदृष्टिदोषो हि गुरोस्तयात्मनः सदैव भक्तेः कुशलं विधास्यति ॥ ४८ ॥
सदृष्टिदोषः यशश्चङ्कमनेः पणायमानो विषयस्य चात्मनः ।
निपातमयं स सैव साधयेत्प्रवादमग्नः प्रमदाजनो यथा ॥ ४९ ॥

अष्टमाधिकरणमारभते-

शून्यमूर्त्यादिपूजा वा सत्यस्यान्वेषणं नु वा ।
भक्तिः स्याद्वास्तवी शून्यपूजादिः सा विरागिणाम् ॥ १ ॥
शून्यपूजादि मूर्खत्वं सत्यस्यान्वेषणं तु यत् ।
विज्ञानस्यानुसारेण भक्तिः सा परमा मता ॥ २ ॥

सूत्रे-परमार्थभक्तिर्महिष्ठा प्रमादविरोधिनी ३-१-२१ ।
भक्तयन्तरमाभासकत्वं विना ३-१-२२ ॥

नवमाधिकरणमारभते-

स्वस्वाकारभृतो देवा निराकारास्तु वा मताः ।
सर्वे प्राणिशरीरास्ते न स्वाकारा अचेतनाः ॥ १ ॥

अतो जनः सिद्धिविभूतिशस्यसंपन्नोऽयमात्मनि भक्तिमात्मन ।
निवेशयेत्सिद्धविटे न जातुचित्कुलेऽन्यथा स्याद्विपुलो ध्रुवप्लवः ॥ ५० ॥
(अ० ८) स्थिरां दधानेन पितृव्यहेतुकां जनेन भक्तिं तदृणस्य शुद्धये ।
परीक्षमाणेन चिरन्तनैर्गिरो धियोषसां चिन्तनरत्वमात्मन ॥ ५१ ॥
महौषधं पैतृकतामहाहृजः प्रमादकुष्ठस्य रसायनं शिवम् ।
सुदोहदः सत्यपदप्रियां पराञ्च भक्तिः परमार्थगामिनीं ॥ ५२ ॥
क्रियाः समस्ता निखिलाश्च भक्तयस्तथाखिलं ज्ञानमनर्थकारणम ।
विनात्र भक्तिं परमार्थगामिनीं तथाहि सर्वं पशुते महार्थकम् ॥ ५३ ॥
(अ० ९) मनोभिवृद्धा मदमत्सराद्यस्तडित्प्रधानाः प्रकृतेश्च शक्तयः ।
क्षपानभस्वोरगसंग्रहादयो नृणां तथार्गविशेषकल्पनाः ॥ ५४ ॥
सरित्समुद्राम्बुदपादपाद्रयः पतङ्गसारङ्गमरीसृपादयः ।
ज्वरातिसारादिरुजश्च कल्पिताः सुरासुरत्वेन पुराणपण्डितैः ॥ ५५ ॥

सर्वे भवेयुः स्वाकाराः सूर्यादेः प्राणिता नवा ।
नाकारहीनता वापि सामञ्जस्यवती यतः ॥ २ ॥
सूत्राणि-मात्रादयः प्रसिद्धाः ३-१-२३ । देवासुरा वृत्तिश्च कत्यादर्शकल्पनाद्याः । ३-१-२४ । नराद्याकृतिरुत्प्रेक्षा तथानाकृतिः ३-१-२५ । न नियता नाव्याहता न च माहात्म्यप्रयोजिका ३-१-२६ ॥

जनेन सर्वात्मनि वा परेषु वा सुरेषु किं वाप्यसुरेषु कल्पिता ।
घनाकृतिः प्राणिसमाकृतिस्तया कवित्वसारेति मतं विपश्चिताम् ॥५६॥
न भास्करेधिप्रयुतावनीसमे न चापि शक्रे विलसत्तडिन्मये ।
न वा गिरीशात्मनि चन्द्रशेखरे नराकृतिर्नाकृतिशून्यतापि वा ॥ ५७ ॥
न कल्पितैर्विन्दुभिरत्र निर्मितं घनात्मकं वस्तु विदन्ति सद्विदः ।
घनात्पृथक्कृत्य तु शब्दमात्रतस्तवादिविन्दुन्तमनं प्रकल्पयेः ॥ ५ ॥
न शब्दमात्रेण तु वस्तुनिश्चयः स्वतन्त्रया वस्तु परीक्षया हि सः ।
जनेन वन्ध्यातनयाख्यधारिणो भवाच्च वन्ध्यातनयो भविष्यति ॥ ५८ ॥
मं वस्त्वनाकारमिहास्ति वस्तुतः समस्तमप्याकृतिमत्समीक्ष्यते ।
न दैर्घ्यविस्तारगभीरतोज्झिते गुणास्तु कश्चित्क्वचनोपलभ्यते ॥ ६० ॥
त्रियन्मुखं दृश्यमवेयसां सुखं गुणाः स्तुदाद्रिः पतिपत्यसां तथा ।
म दैर्घ्यविस्तारगभीरसामयं घनत्वमेतान्यपि जातु मुञ्चति ॥ ६१ ॥
घनत्वमेवाकृतिरत्र संमतानपेक्ष्यमस्याः स्फुटमन्तदर्शनम् ।
मद्वैव सर्वं स्थितमेतया यतः किमङ्ग सद्वस्तु भवेदनाकृति ॥ ६२ ॥
घनस्य दैर्घ्यादिमयस्य केवलं यथांशमंशानपि वा पृथक् पृथक् ।
विभज्य शब्देन जनः प्रकल्पयेत्तथापि रेखामथ विन्दुमेव वा ॥ ६३ ॥

दशमाधिकरणमारभ्यते-

शिल्पशास्त्रप्रचारेपि प्रासादादौ महाव्ययः ।
कार्यो न वा, कार्य एव देवमन्दिरभक्तितः ॥ १ ॥
देवमन्दिरनाम्नापि श्मशानं विद्याविवर्जनात् ।
श्मशानमेव तद्दूरान्मानवः परिवर्जयेत् ॥ २ ॥

सूत्राणि—महिष्ठा सरस्वती ३-१-२७ । तदाराधनं परमार्थ-भक्तिसमम् ३-१-२८ । सर्वजनन्यपि पैशाचैः; कुपुत्रैरुपेक्षिता

---

तथैव सत्तामपि तार्किकाङ्कुरो निराकृतिं कल्पयतीह वाग्विभोः ।
प्रसह्य भिक्षुः परिगृह्यतामथ प्रपञ्चहेतुत्वपदेभविष्यति ॥ ६४ ॥
परस्परव्याहतकल्पनाकुला अनाकृतिस्त्रीपुरुषाकृतिश्रिताः ।
कुतर्कणाढ्येव विशेषगोचरा महत्त्वमेषां न हि ताः प्रपुञ्जते ॥ ६५ ॥
( अ० १० ) सुरेषु सर्वेषु सरस्वती किल प्रसा महिष्ठा सकलोपजीविता ।
फलं तदाराधनवाखिलं नृणां तदीयभक्तिः परमार्थसेवनम् ॥ ६६ ॥
पिशाचपूजामणिमाटिटायिनीं प्रपञ्चमानैः कुसुतैरुपेक्षिता ।
फलानपेक्षैरुदयन्महाफलैः श्रिता सुपुत्रैर्जयतीह भारती ॥ ६७ ॥
वसूनि वाञ्छन्वपि सिद्धिलोलुपः पतत्यवश्यं निरये विपन्मये ।
यमून्यवाञ्छन्वपि शास्त्रसेवया प्रयाति संपत्तिमिहाद्भुतां क्रतौ ॥ ६८ ॥
सरस्वती यत्र न यन्त्रपुत्रकप्रधानविस्तारितसाधनैर्जनैः ।
निषेव्यते चैत्यमनार्यसेवितं तदुच्यते नैव तु देवमन्दिरम् ॥ ६९ ॥
न यत्र शास्त्राणि न शिल्पसंततिर्न यत्र च व्याचकुलं सुलक्षणम् ।
विपश्चितो यत्र न विभुतोद्यमाः श्मशानतुल्यं सदवैति मन्दिरम् ॥ ७० ॥

निरयनिपातरसिकैः ३-१-२९ । सात्त्विकैराराध्यमाना फलान-
पेक्षैः क्रथमगणयद्भिर्महाफलशालिभिः ३-१-३० । तदालयाः प्रा-
सादाः ३-१-३१ । तदभावे चैत्यान्यत्यन्तमनपेक्ष्याणि ३-१-३२ ॥

इति तृतीयाध्यायस्य प्रथमाह्निकम् ॥

---

न हूयते यत्र धनं महाधनैरनघ्यसज्जीकृतपुस्तकोत्करे ।
समुल्लसत्यन्नमयप्रसूचिव प्रवृत्तशिल्पस्वनसामगीतिके ॥ ७१ ॥
प्रमादमेध्याध्वरं महाध्वरे समर्चिसाध्येतृमुखैर्निभं ।
सुविद्वदार्त्विज्यसनाथवेदिके प्रमथ्यानतुल्यं सुरसद्म संहितुः ॥ ७२ ॥

विनयनिलयैः शिल्पेनल्यधैरसमोद्यमै-
रनृतविरतैर्दम्भद्विड्भिः प्रमादमदोज्झितैः ।
ध्रुवमपि पदे विश्वं ज्ञाने करे यदतारका:
कलयितुमलं बद्धोत्साहैरनाप्तबन्धुभिः ॥ ७३ ॥
प्रवचनपरैरन्तेवासिप्रियैरभिमण्डितैः-
क्षमनविमुखैः संविद्वद्भिरपंदेव सनाथितम् ।
मणितमधुनो विस्तीर्णायामदः सुरमन्दिरं
सफलमखिलं तत्साध्यं नृणां खलु यत्नतः ॥ ७४ ॥

इति तृतीयाध्यायस्य प्रथमाह्निकम् ।

---

तृतीयाध्याये द्वितीयाह्निके प्रथमाधिकरणमारभते-

वस्तुस्वभावापेक्षाणि भिन्नान्याराधनानि वा ।
प्रतीकादिप्रपञ्चैर्वा वस्तुवृत्तानपेक्षिभिः ॥ १ ॥
प्रतीकादिप्रपञ्चैः स्युस्तथा प्रायेण [illegible] ।
वस्तुस्वभावापेक्षित्वाद्भिन्नान्याराधनानि तु ॥ २ ॥

सूत्राणि-आराधनानि ३-२-१ । यज्ञो देवानां वाणिज्यभिप्रः ३-२-२ । व्याहताननुसरणं परमार्थस्य ३-२-३ । विज्ञानप्रचारो महायज्ञः सरस्वत्याः ३-२-४ । साक्षादुपासनं पित्रादीनां संनिकृष्टानाम् ३-२-५ । असंनिकृष्टानां ध्यानादि ३ २-६ । तत्रोपयोगः प्रतीकपुस्तकादीनाम् ३-२-७ । सच्चरितानुकरणं महापुरुषाणां

---

(अ. ५) इति बोध्य सुरान्सरस्वतीं-प्रभृतीनर्चयतां विपश्चिताम् ।
अमुरेष्वग्रहेलनावतामयमाराधनविस्तरोमुते ॥ १ ॥
जगदभ्युदयाय सर्वतः समयोगेण समाहृतैस्तथा ।
जनवासु मुहुः प्रचारितैर्विविधैः शिल्पकलादिभिः शिवैः ॥ २ ॥
कविराध्ययनादिमन्दिरं परितश्छात्रनिवासमण्डिते ।
महनीयतमां सरस्वतीं महतार्चेन जनः समर्चयेत् ॥ ३ ॥
जननीं जनकं गुरुंस्तथा पदसंवाहनभोजनादिभिः ।
भजति स्वयमेव यत्नवानभिगम्यावहितो जितश्रमः ॥ ४ ॥
अभिगम्य पुनः स्वयं यदा न समाराधयितुं क्षमेत तान् ।
स्मरणादिभिरेव साधुभिः शमयत्युत्सुकतां कृतक्षतां ॥ ५ ॥
स्मरणाद्युपयोगि पुस्तकं प्रतिमां लक्ष्म तथा परं भजन् ।
विरहेष्वनुपेक्षितक्रियोऽविधस्यं गुरुमर्चयेज्जनः ॥ ६ ॥

तथा च तैत्तिरीया: ३-२-८ । आज्ञापालनं शान्त्यभक्तश्च नृपाणाम् ३-२-९ । स्वाध्यायाद्याचार्यस्य ३-२-१० । होमादि: सूर्यादीनाम् ३-२-११ । सर्व इमे देवा: सर्वेभ्यायं यज्ञो व्यक्त्यर्थेभ्यो नृ ३-२-१२ । एवमन्येषाम् ३-२-१३ ॥

द्वितीयाधिकरणमारभ्यते-

विषयो नवधाभक्तिर्नियतो वान्यथापि वा ।
सर्वत्र नवधाभक्तिर्नियमस्तत्र नेष्यताम् ॥ १ ॥
वस्तुवृत्तानुसार्येव दृष्टमाराधनं यत: ।
आराधनत्वान्नियम: श्रवणादावपीष्यते ॥ २ ॥

सूत्राणि-श्रवणं कीर्तनं वन्दनं चोभयथा ३-२-१४ । स्मरणमसंनिकर्षे ३-२-१५ । चरणसेवनं दास्यं च संनिकर्षे ३-२-१६

---

अजस्रमसकृच्चैव विनिरस्याखिलेन चेतसा ।
चरितानि यशांसि चाप्यनघान्यनिशं महात्मनाम् ॥ ७ ॥
दृष्ट [illegible]कलाविधित्सया सततं सेवितया महोदयम: ।
किमतोऽस्य भक्तिरर्चयेद्गुरुराचार्यमहार्यनिश्चय: ॥ ८ ॥
विनयेन सदैव वर्तनयाचलमास्थासु कथाविदस्खलन् ।
अपरिक्षतशान्तिरात्मवानविषयं तोषयति प्रशासकान् ॥ ९ ॥
यजनाग्निगुडाज्यपायसैर्घनसारागुरुधूपचन्दनै: ।
अधिवास्य हुतैर्जनोऽर्चयेद्गुरुविपर्जन्यमदन्मुखान्सुरान् ॥ १० ॥
उदिता हि सन्ति देवता दमा एव यज्ञस्तदुपासना मता ।
अत एतदभ्युदयार्थमात्मन: स्थितिरर्थस्य हि यत्र उच्यते ॥ ११ ॥

अर्चनमनेकधा प्रतीकनीये प्रतीके च ३-२-१७। सख्यं समान-योरुभयथा ३-२ १८। आत्मनिवेदनं जायापत्योः ३-२-१९ ॥

सूतोऽधिकरणमारभ्यते-

इष्टो नवाधिकारादेर्विप्लवाद्भक्तिसंश्रयः।
इष्टो यस्माद्विरागार्तैः श्लोकस्मादीह धार्यते ॥ १ ॥
स्त्रियः स्त्रीत्वेन पुंसश्च पुंस्त्वेनैवेष्यते यतः।
बाह्यतो भक्तिरिष्टेति नाधिकारादिविप्लवः ॥ २ ॥

सूत्राणि—फलाय हरिसेवनं हरभाददानाद्वा ३-२-२०। नामफलादि तामसानाम् ३-२-२१। विपर्यासः प्रमादवतां स भक्त्याभासस्तदमुताराधनं व्याहतानुसरणात् ३-२-२२ ॥

---

(अ० २) पुंसश्चार्चनमन्यसंनिहिते संनिहितेऽपि वस्तुनि।
स्मरणं पुनरत्र युज्यते सदुपास्ये सविधानुपस्थिते ॥ १२ ॥
सविधस्थित एव संमता स्मरणापास्तिरथापि दासता।
बहुधोचितमर्चनं भिदामनुगच्छद्विषयस्य सर्वथा ॥ १३ ॥
समयेरिह सख्यमात्मनेार्पणमिष्टं किल भर्तृभार्ययोः।
अमपेत्य फलं कृतात्मभिः कृतिभिर्भक्तिरितीयमाहृता ॥ १४ ॥

( अ० ३ ) अथ हेतुमपेत्य यज्जनः प्रतिमाद्यास्वमतादि सेवते।
नहि भक्तिरियं विमूढता मतती वस्त्वविलम्भणाद्यथा ॥ १५ ॥
इह भक्तिमुशन्ति तामसा अधिकारादिविपर्ययेण ये।
असुरान्मथमत्सरादिकान्प्रतिसर्गान्परितर्पयन्ति ते ॥ १६ ॥
पितरौ द्विषतः स्वचारितामुभतः सिद्धविटपर्वभिः।
कवधोरयतः सरस्वतीमभिचारादिविधावसेविनः ॥ १७ ॥

वसुधाधिकरणमारभ्यते =

सर्वात्मनः प्रतीकाद्यैर्भक्तिर्धर्मेण वा भवेत् ।

विरज्य सर्वतः कार्यात्प्रतीकाद्यैस्तु सा भवेत् ॥ १ ॥

सर सेवादिधर्मेण सेवा भगवतो मता ।

न शून्यस्तवमूर्त्यादि-पूजनैः सा भविष्यति ॥ २ ॥

सूत्राणि—धर्मो भृग्नः सर्वात्मनो देवदेवस्य ३-२-२३ । धर्मः सत्यं धारणात् ३-२-२४ । धर्म आत्मनः प्रतिकूलस्यान्यस्मिन्न-

---

परिहृत्य विवर्णितां सदा सुखमाणान्सकलान्भृकुंसकान ।

शिशुरप्यवधानवाङ्कथं सुरभक्तानभिधातुमर्हति ॥ १८ ॥

(अ० ४) अपरेद्युरति कार्तिनः सुरेज्यमाराधनविस्तरः क्षितेः ।

सकलात्मनि देवतोत्तमे ननु धर्मार्चनमेकमिष्यते ॥ १९ ॥

यदिहात्मनि वा परत्र वा परमं सत्यमसत्यवर्जितम ।

मनसा वचसाथ कर्मणानुगमस्तस्य तु धर्म उच्यते ॥ २० ॥

अनुवेद्म्यधृतं जगत्सदा परिणामेदमनन्तरेण यत् ।

तदमुं पवदन्ति शाश्वतं किल धर्मे पथिसा स्थितिस्थितः ॥ २१ ॥

यदहात्मनि वा परेषु वा सदसत्त्वादिविभूतिकल्पनम् ।

तदनुव्रतमेव कर्म वः स्फुटमाख्यातमधर्म इत्यतः ॥ २२ ॥

अनुयानपरः कुमारिकाकुलसंदूषणशासको यमुः ।

स्वयमार्त्तवनस्य धारयतिलोभात्सविकर्मकर्मठः ॥ २३ ॥

विषदुद्दशमादिवाङ्कया सुरगन्धर्वविदस्तयापि वा ।

अपि राघवतत्रासुदेवयोर्बसुधाभरावतारणाय वा २४ ॥

नुष्ठानं सर्वभूतात्मभावात् ३-२-२५। स उद्योगाभयस्तमोविरोधा
३-२-२६। अधर्मस्तद्विरुद्धः ३-२-२७। मूल आराधनं प्रधा-
स्तुरिव तत्र ज्ञानभक्तिकर्मणामैक्यम् ३-२-२८। तस्मिन्प्रसादा-
संभवः स्वभावादेव ३-२-२९॥

---

पतितः स्वयमात्मना विपश्चिदपि प्राप्य धर्मकल्पुकः।
विनिपातयितुं परान्मुहुः कलयन्नेष तथैव वर्तते॥ २५॥
अपि पूतिनि पात्रके मलजातोज्झ्रामि यत्नात्पयोऽक्षयम्।
कथमीदृगिहाभ्युपेयतामनुकूलेनापि जनेन धार्मिकः॥ २६॥
न निजप्रतिकूलमाचरेन्मनुजेष्वप्य जनः कदा चन।
क्षति जायत्तधर्ममूलिरपि विरजाः किल सत्यमूलकम्॥ २७॥
अनुकूलमिहाभ्युपैति यः परचित्तस्य विलोपनं कृती।
निजचित्तविलोपकारिणं प्रहरन्तस्युपसाधुसम्मतः॥ २८॥
परचित्तविलोपनं हि यो ह्यनुकूलं कलयत्यनारतम्।
क्रियमाणमिदं निजेन वा न कथं रोत्स्यति परेण वा॥ २९॥
अनुकूलमिदं यदोच्यते मनु तस्यु परितोषवेत्तदा।
प्रतिकूलमथोच्यते तदा कुपते नस्तु कथं परं प्रति॥ ३०॥
स्थिरतोऽपि य एव धार्मिकः किल धर्मः स्थिरसत्यमूलकः।
तमसो रिपुरप्य विप्रता पतनेसौ महतोऽप्यनेन च॥ ३१॥
तमसः सुहृदुत्तमं द्विषदुचितः पूर्वमधर्म एव यः।
चरणोकृत आसुरैरसावतिबीभत्सकसंकटकर्मभिः॥ ३२॥
सकलोत्सर्जनि भूहि देवते स्वपरिच्छेदमहर्दिवाविनि।
कथमत्र कदापि संभवेच्चतु दोषः खलु पक्षपातजः॥ ३३॥

पञ्चमाधिकरणमारचयति-

शिक्षासूत्रादिराचारः पालनीयोथवा नवा ।
फलस्य पालनेनार्थः फलं स्वर्गादिकं न चेत् ॥ १ ॥
स्वामोक्तमोहशा सर्व पालनीयमहैतुकैः ।
हेतुदृष्टया पालयंस्तु मूर्खेषु गणनां वहेत् ॥ २ ॥

सूत्राणि—प्रवर्तमान आचारो धर्म इत्येके ३-२-३०। तस्या-मोक्तस्य हेत्वविरुद्धस्यानुष्ठानं विधित्वात् ३-२-३१। अन्यथा-वामोन्यं तत्र विध्याभासे प्रमादवद्भिरनुस्मृते ३ २-३२। सविषयः स्वस्वस्मृतीनां पित्र्याद्याचायाश्चेति तत एवावगन्तव्यः ३-२ ३३ ॥

इति तृतीयाध्यायस्य द्वितीयाह्निकम् ॥

---

षष्ठधर्मविवर्जनं सदानुगतिर्धर्मपरायणा सदा ।
दृढमेकमुपासनं मतं ननु विश्वात्मनि भूम्नि चिन्मये ॥ ३४ ॥
नियमस्य यथानुपालनं परमोपास्तिरिह प्रशास्तरि ।
अखिलात्मनि धर्मपालनं परमाराधनमिष्यते तथा ॥ ३५ ॥

इत्येव भूम्नि चिदात्मनि विश्वरूपे निष्प्रत्यूहविमर्शे सकलर्द्धियुक्ते ।
आराधनाविधिरवाप्ति निमान्तकाल्पः शास्त्रात्मनामभिमतः स्थिरधर्मकल्पः॥३६॥

(४०५) आचारजालमपि देशकुलाद्यधीनं धर्माख्यया कतिविदाहुरदोषदुष्टम् ।
कालेन तस्य परिवृत्तिरशास्त्रतत्त्वमज्ञा प्रयोजयति मत्सुधियो विवन्तु ॥ ३७ ॥
आप्तोदितं तु विधिरूपतयानपेक्ष्य हेतूनशास्त्रवदपि स्फुटमाचरन्ति ।
आचारजालमपदोषमदुष्टभावा भक्त्या पितृव्रय समाजभयेन वापि ॥ ३८ ॥
ये जातिशास्त्रविधिरूपेव तस्य यात्रा नाशस्त्रेण संततिमिहावहतीतिविद्युः ।
ते हैतुकास्तु वणिजो गगनारविन्दं विक्रीय संपदनुयान्ति विपत्फलाय ॥ ३९ ॥

इति तृतीयाध्यायस्य द्वितीयाह्निकम् ॥

# चतुर्थाध्याये प्रथमाह्निकम् ।

चतुर्थाध्याये प्रथमाह्निके प्रथमाधिकरणमारभ्यते—

सम्बन्धो ज्ञानविषयः स्वभावो वापि तादृशः ।
सम्बन्धविषयं ज्ञानं स्वभावो नावबुध्यते ॥ १ ॥
ज्ञानं स्वविषयं यत्तत्स्वभावविषयं स्फुटम् ।
सम्बन्धस्तु तदज्ञातामुभयं विषयेऽस्य तु ॥ २ ॥

सूत्राणि— सकिंचमूलप्रहेतुकं कर्मकृतम् ४-१-१ । तत्र ज्ञानाङ्कुरमात्रमपेक्षितम् ४-१-२ । प्रकृतिविज्ञानविकासमपेक्षं ममत्वलेशवत्कर्म ४-१-३ । ज्ञानं स्वभावसम्बन्धावगाहि ४-१-४॥

द्वितीयाधिकरणमारभ्यते—

शास्त्रेण चित्तसंस्कारो मन्त्रैर्भावनया तथा ।
द्रव्यादिसाधनं किं वा, मिश्रयेद्द्रव्यादि निश्चितम् ॥१॥

---

( अ. १ ) हेतुमद्धेतुकं चेत्युक्तं कर्म द्विधा पूर्वम् ।
ज्ञानार्थमुख्यमेकं परं तु भक्त्यर्थमत्र मतम् ॥ १ ॥
यत्प्राक्तनसंस्कृतिजा-विकासमपेक्षमत्र स्यात् ।
तत्स्यति ममतालेशे कर्माचरति पुनर्ज्ञानम् ॥ २ ॥
निष्कामकर्मभक्त्यर्हं ज्ञानस्य निर्ममत्वं सत् ।
मुख्यं कर्माचरतः सन्न्यसनं कामयत्तु मतम् ॥ ३ ॥
भक्त्यर्थं कर्म चेति द्वयं पुनर्ज्ञानपरिनिष्ठम् ।
यत्स्यत्यनुपदमेतज्ज्ञानं कर्माच्च तु प्रपञ्चयति ॥ ४ ॥

शब्दाद्भावनया वापि द्रव्यसिद्धिरसंगता ।
तस्माच्छास्त्रोदितत्त्वज्ञश्चेतः संस्कुरुते परम् ॥ २ ॥

सूत्राणि—संग्रहाय शास्त्रापेक्षा ४–१–५ । शास्त्रं मनःसंस्कारकम् ४–१–६ । न शब्दो न च मनोविकारो द्रव्यमुत्पादयति साक्षात्परिवर्त्तयति वा ४–१–७ । स्पष्टं तदारुणेरादेशमनुसरताम् ४–१–८ ॥

तृतीयाधिकरणमारभ्यते—

श्रुत्यादिशास्त्रे सकला विषया अल्पकास्तु वा ।
श्रुत्यादि दिव्यशास्त्रं यत्सर्वज्ञानिधिस्ततः ॥ १ ॥
शास्त्रस्य दिव्यः सत्यांशः को विशेषः श्रुताविह ।
ज्ञानस्य न परिच्छेदः शास्त्रमतोऽपवर्गाद्धृयतः ॥ २ ॥

---

श्रेयानां प्रकृतेर्यद्धितानं कर्मणोऽपेक्ष्यम् ।
तत्स्यात्स्वभावविषयं संबन्धं बोधगाहेत ॥ ५ ॥
( श्लो० २ ) भूतं यन्मनसेतन्मूर्तामूर्तं प्रकृत्याख्यम् ।
विज्ञानमखिलमस्माज्ज्ञेयानां संशयो नात्र ॥ ६ ॥
बोधस्तु पूर्वजानां विज्ञानं तस्य संग्रहे विहिते ।
तदुपक्षयं साधयितुः शास्त्रैर्मं महान्व्ययो भवति ॥ ७ ॥
तस्माद्धतस्वबर्जन-पुरःसरं तत्त्वसंग्रहायात्र ।
पूर्वेषां शास्त्रापेक्षा न तु शास्त्रमशक्यमत्र निर्मातुम् ॥ ८ ॥
मनसः शास्त्राभ्यासैः संस्काराख्यं फलं साक्षात् ।
ज्ञानैर्भावनया वा न द्रव्योत्पत्तिर्परिवृत्तौ ॥ ९ ॥

सूत्रे—शास्त्रविशेषाणां विषयनियमः ४-१-६ । विषयान्त
रस्पर्शो तत्तच्छास्त्रेण पूर्तिर्यथा भक्ष्यादौ धर्मसंहितायाः ४-१-१

चतुर्थाधिकरणमारभ्यते—

हरेः स्तम्भोद्भवत्वादि-कथा अत्युक्तयो नवा ।
नात्युक्तयश्चिरत्नानां भक्त्या वाच्युषिता यतः ॥ १ ॥

---

मत्पिण्डमेकमपि यः परीक्षते सम्यग् सवेत्त्यखिलम् ।
एकं परीक्ष्य शब्दं शब्दप्रकृतिं तथैव ज्ञानीमः ॥ १० ॥
तत्त्वातत्त्वविवेकं विधाय यत्नेन शास्त्रेभ्यः ।
कार्यं च तत्त्वसंग्रह उपेक्षितव्यं तु यत्नतस्त्वम् ॥ ११ ॥
( अ० ३ ) तत्रापि यस्य विषयो यः स्याच्छास्त्रस्य तस्य तत्रैव ।
प्रमाणवत्संभवः स्यात्प्रायो नान्यत्र विषये तु ॥ १२ ॥
स्पष्टं तु भिन्नविषये तत्तच्छास्त्रेण पूर्तिः स्यात् ।
भक्ष्याभक्ष्यविचारे स्मर्यं यथा वैद्यशास्त्रेण ॥ १३ ॥
( अ० ४ ) एका स्वभावर्णन-शैली रूपकमयी द्वितीया स्यात् ।
अत्युक्तिस्तु तृतीया वाचोयुक्तिस्वयोत्युक्ता ॥ १४ ॥
तत्रेयं जलधिस्तरति तरुवरा वल्लिवनितासक्ताः ।
श्लिष्टा इति पुरुषा इह वनितासंश्लिष्टा इति क्रमशः ॥ १५ ॥
तदुदाहरणान्यत्र प्रथमा वैज्ञानिकी शैली ।
प्रायो वैदिकशैली दृष्टा रूपकमयी कविभिः ॥ १६ ॥
घोराणिकस्त्वत्युक्तिर्मोहं तनुते प्रमाणवत्स्वतुलम् ।
मत्वा स्वभाववर्णन-शैलीं तां मोहमेति जनः ॥ १७ ॥

व्याहते न क्वचित्कुद्धा चिरन्ते वा नवेपि वा ।

तस्मादन्युक्तयः सर्वे वादा एतादृशा इह ॥ २ ॥

सूत्रम्—स्वभावोक्तिरुपक्षेपोक्तिभेदाद्वाक्यार्थानवगतिः४-१-११॥

पञ्चमाधिकरणमारभते—

ऋषीणां सर्वदर्शित्वं केषामप्यस्ति वा नवा ।

अस्त्यप्रतिहता तेषां दृष्टिः सर्वार्थदर्शिनी ॥ १ ॥

कस्यापि नेदृशी दृष्टिः सर्वा हि मितदृष्टिकः ।

परीक्ष्य प्रकृतेस्तत्त्वं नवं जानन्नृषिस्ततः ॥ २ ॥

अत्राधिरूपणं षट्त्रिंशत्करणादिषु कृतं वेदे ।

क्रियाविशेषनिगरणात्सैवात्युक्तिः परार्थेषु ॥ १८ ॥

अकपूयमूत्रशोणितगूथाद्यं यन्मृतेः पूर्वम ।

वैतरणीनिरयाद्या सत्यात्युक्तिस्तथैव विज्ञेया ॥ १९ ॥

धनिनो हिरण्यगर्भे दण्डः स हिरण्यकशिपुसुखाल्पः ।

अनडाहकार्यशक्त्या षण्ढां महिषादिविनिगातः ॥ २० ॥

सर्वे पुराणऋषिभिरत्युक्त्या हन्त परिणमितम् ।

नरनार्यादिकथामयमुदितं महता प्रपञ्चेन ॥ २१ ॥

वेदव्यूहत्कथादौ मिश्रामहसस्य व्याख्याने ।

पाषण्डपुस्तकेषु च अन्यकथासु च बहुः प्रपञ्चोस्ति ॥ २२ ॥

सभ्याः कथाप्रपञ्चानेतान्मनसो विनोदाय ।

शृण्वन्ति न पुनरीदृशमत्युक्तिं वास्तवीं प्रपञ्चन्ते ॥ २३ ॥

मूर्खास्तु बहुनर्द्धिं कथायाः सिंहनिर्गमं स्तम्भात् ।

भृङ्गसदृशमधुनापि रामतत्त्वं चमदभूमौ ॥ २४ ॥

सूत्राणि—ऋषित्वमनधिगतदर्शित्वं तत्तद्विषये ४-१-१२ । तदद्भुतं प्रकृतिविकृतिफलम् ४-१-१३ । सा मन्त्रदर्शिता मन्त्राणां नवाविष्कृतरहस्यपिशुनत्वात् ४-१-१४ ॥

षष्ठाधिकरणमारभ्यते—

निगमागममन्त्राणां पाठाद्विचित्रं फलं न वा ।
पाठाद्दृष्ट्यादिकं चित्रं फलं दृष्टं महात्मभिः ॥ १ ॥

---

जवनावरजानकेः सह संभाषां विकटघोटानाम ।
विद्युत्संक्रममेघं पतद्वहाम्भूर्णंभलकानाम ॥ २५ ॥
नास्त्यिकमेतत्सर्वं प्रख्याप्य जनेषु मुग्धेषु ।
परमार्थनाशनपरान्धतरन्त्यधन्यामिमां भूमिम् ॥ २६ ॥
दृष्ट्वा पुराणवचने आत्मान्विष्यासमापन्नान् ।
विश्वासयन्ति खिलवाः स्त्रीषेषु जुगुप्सितेष्वसत्येषु ॥ २७ ॥
( ष० ५ ) यावत्पूर्वाधिगतं तस्मादपि अद्भुतादधिगमः ।
प्रकृतिपरीक्षाविधिभिस्तत्तद्विषये ऋषित्वं स्यात् ॥ २८ ॥
तत्र परीक्षाशक्तिर्भक्तिः सत्येनृताज्जुगुप्सा च ।
पूर्वैकसंक्रान्ता च प्रतिभावस्यानुकूल्यं च ॥ २९ ॥
साधनमीदृगपेक्ष्यं न पुनर्जन्मान्तरीयसंस्कारः ।
देवविशेषकृपा वा मन्त्रजपादिप्रपञ्चो वा ॥ ३० ॥
आध्यात्मिकतादात्म्यः समाधिमूर्छानिपातो वा ।
परचित्तसंक्रान्तिः प्रतीक्षचरणादिसेवा वा ॥ ३१ ॥
मन्त्रा वाक्यानि नवाविष्कृततत्त्वस्य सूचकानि यतः ।
तादृक्षतत्त्वालोकनमिष्टं किल मन्त्रदर्शनं सुधियाम् ॥ ३२ ॥

शब्दपाठात्फलं नेहक् तस्मात्कार्योपयोगिता ।
मन्त्राणामिति सिद्धान्तः किं शुष्कैरत्र वर्णनैः ॥ २॥

सूत्राणि—ते स्पष्टार्थबोधकाः सांकेतिकाश्च ४-१-१५ । विध्युपयोग्यर्थबोधकत्वेन तदुपयोगः ४-१-१६ । क्रियानुपयोग पाठो निष्फलो विशेषतोऽर्थाग्रहे ४-१-१७ । रसादिबीजत्वेन सांकेतिकानां विध्युपयोगः ४-१-१८ ॥

सप्तमाधिकरणमारभ्यते—

संस्कृतेनात्र चित्तेन सिद्धिः संकल्पजा नवा ।
अस्ति संकल्पजा सिद्धिरीशाद्याकृष्टिकारिणी ॥ १ ॥

---

(अ० ६) मन्त्रा द्विविधा दृष्टाः केचित्स्फुटमर्थबोधका यथा मुनिषु ।
सांकेतिका दृहान्ये विदिता नागार्जुनादिलेखेषु ॥ ३३ ॥
तेषामुपयोग उक्तः श्रीतानामरणिमन्थनादिकार्येषु ।
हूं हूंमित्याठीनां विषादियोगप्रकारेषु ॥ ३४ ॥
अर्थानपेक्षशब्दाम्रेडनमात्रं तु निष्फलं नूनम् ।
किंत्वा परवनारणमात्रफलं रामनामघोषणवत् ॥ ३५ ॥
रामेति यथा घुष्यम्रोडकमाकर्षति स्त्रियश्चैव ।
मन्त्राडम्बरकुशलस्तथैव मुग्धान्नलोभयति ॥ ३६ ॥
उपदिश्य वारिमेकं क्षते यथा किल भिषग्धूर्त्तः ।
अङ्गे व्यथेन महता विदधुर्भेषजविवेचनं सुविरम् ॥ ३७ ॥
यत्तं मान्त्रिकवित्तवा विषयोगैर्मारणादि कुर्वाणाः ।
मन्त्रस्य तर्पणाद्यैः सिद्धिं विदधुः परात्मतारयितुम् ॥ ३८ ॥

वधिसंकल्पमात्रेण कश्चिन्न लभते वधि ।
संकल्पसिद्धिश्चित्तस्य संस्कृतस्यापि नास्यतः ॥ २ ॥

सूत्रं—असंस्कृतेन मनसा फले निकर्षः प्रायो व्याहृतानुसरणात् ४-१-१६ । संस्कृतेन तदुत्कर्षः ४-१-२० ॥

(अ० ७) गणिसाध्यसंस्कृतं मनउल्लासमयया प्रकल्पयति ।

चित्तादिः क्रियशक्तः खत्वाद्यपुण्यकोद्भवम् ॥ ३९ ॥
वंदृङ्गामसमोदक-भक्षणकुशलाश्चरन्ति शकटेषु ।
रज्जुनिबद्धेषु चिरं गायन्तः पुण्यकस्तोत्रम् ॥ ४० ॥
गणिसादिकौशलाद्यः सुमहोद्योगस्तु यन्त्र णि ।
अवमत्सरराणि घटयन्खल्वाहुयनार्थिनो हसति ॥ ४१ ॥
रामस्य चिन्तया किंच पुण्यक्रमागात्कुबेरभुवः ।
वाशिष्ठयज्ञहतया रघोः द्विजोपस्य शाकमगात् ॥ ४२ ॥
आस्यात्रेति विमुञ्चन्वक्त्र कविप्रपीडूपम् ।
विज्ञानमधःकुर्वन्प्रयाणीकृत्याज्ञवां घोरां ॥ ४३ ॥
कौबेरजानिकाद्यैर्गुणैर्विनिगूहितं दृश्यम् ।
शाकस्य दर्शयन्विकसितमतिर्द्विगुणसंमोहः ॥ ४४ ॥
पोटाभिर्विकटाभिर्मूर्खैरन्यैर्भुक्तुसेवच ।
सांकल्पिकभावादिस्तुतिभिस्त्रिगुणीकृतं वहन्मोहम् ॥ ४५ ।
पाणड्योतिर्दर्शक-यन्त्रादिकथाभिरूनषष्टीः ।
दृष्टाभिः परितुष्यन्मोहेन चतुर्गुणेन ततः ॥ ४६ ॥
कण्यार्घावरभावं कण्यास्य किल स्तुवद्भिरथ ।
मंधव्याख्यावद्भिः पञ्चगुणस्तोषचित्तमोहः ॥ ४७ ॥

अष्टमाधिकारमारचयति—

आरब्धारम्भयोः कश्चिद्गुणभेदो भवेन्नवा ।
गुणभेदो न भवति कार्यकारणयोः क्वचित् ॥ १ ॥
दृष्टस्तुलादिसाम्येपि गुणभेदो महानिह ।
वायुद्वयस्य संयोग-विशेषेभ्युसमुद्भवात् ॥ २ ॥

सूत्राणि—सति द्रव्ये तुमयत्रान्यथा ह्यासङ्गादापत्तिः ४-१-१२। न नूतनमन्यत्र तत्त्वयोगात् ४-१-२२। तत्रापि तुलादिसाम्यम् ४-१-२३। अघटितत्वेन ज्ञानं तत्त्वम् ४-१-२४।

---

आत्रेयो भारतवासी कलाकुमारः कलाध्यक्षः ।
आचार्यो वा दर्शन-काव्यादेर्नश्यति प्रायः ॥ ४८ ॥
(अ० ८) भावनया वा शब्देरपि वा द्रव्यस्य नोत्पत्तिः ।
द्रव्याणामिह योगाद्द्रव्यं घटकैर्हि सद्दृश्यं स्यात् ॥ ४९ ॥
योगेपि तु नाभिनवं कार्यमिहान्यत्र तत्त्वयोगात्स्यात् ।
तत्त्वानामपि योगे न तुलादौ भवति परिस्फुत्तिः ॥ ५० ॥
तत्त्वान्यत्रोपयतान्यत्रावधि निश्चितानि विद्वद्भिः ।
अघटितमिति यज्ज्ञातं तत्त्वं तत्संमतं सुधियाम् ॥ ५१ ॥
अघटितमिति यत्संप्रति विज्ञातं तत्य घटितत्वम् ।
अम्भुन इव संभाव्यं वायुद्वयसंयोगघटितस्य ॥ ५२ ॥
घटनाहि निश्चितं यत्प्राक्तनेनानर्थकार्यम् ।
अद्भुतमिह घटने यत्तस्माद्विज्ञानमिदमत्र ॥ ५३ ॥
भ्रान्तिमिह विज्ञानं किमपीति ज्ञानमेव विज्ञानम् ।
अथमंत्रेन विनाथं मनुजः पशुरेव विज्ञेयः ॥ ५४ ॥

नवमाधिकरणमारभ्यते—

निराकारात्समुद्भूतं साकारं सकलं नथा ।
निर्गुणाच्च निराकाराद्दोशात्सर्वंसमुद्भवः ॥ १ ॥
निर्गुणं च निराकारं तत्त्वं नास्तीह किंचन ।
तत्त्वोकारे त्वसद्ग्राहः कार्यं स्वाकारविप्लवे ॥ २ ॥

---

अस्तिमिह विज्ञानं बौद्धादीनि प्रपञ्च मोहान्धः ।
विज्ञानस्य विशुद्धे न चेष्ट च सत्त्व सत्प्रयुक्तिः ॥ ५५ ॥
बौद्धादो विज्ञानं पूर्णं परिशुद्धिरहितं च ।
शिल्पकलागणनादिक्रमपूर्णमेवह सर्वमिदम् ॥ ५६ ॥
मूर्खाणां प्रतिपत्तिर्बौद्धाद्यविज्ञानतामेवा ।
न हि विज्ञानं वैदिकमर्वि .कं वा स्यात् किञ्चित् ॥ ५७ ॥
बौद्धादर्शनविमन्थात्साधोयानविसंभमेण यथा ।
स्फुरकुशलाकाघातादेर्न विज्ञानमात्रेपि ॥ ५८ ॥
न स्थिरता विज्ञाने नैरात्म्यादौ तथैकमत्य च ।
न तु तेन कार्यहानिर्विज्ञानवतां कदापि संभवति ॥ ५९ ॥
विज्ञानस्यापूर्तिं पश्यन्विज्ञानमिच्छेत्कः ।
पद्भ्यां स्खलन मनुजः प्राणायामैः खमुह्यते ॥ ६० ॥
उपवासपरो मूर्खो विश्वर्कारं भोज्यमुपहसतु ।
प्रतिवेशिजनस्य कथं नापत्रपया विडीनश्चेत् ॥ ६१ ॥
निर्विज्ञानः कथमिव विज्ञानमपूर्णमुपहसतु ।
संकल्पविप्लवैरेर्मूर्खाणां चेत्मनारितो न भवेत् ॥ ६२ ॥
( ख० ६ ) साकारमेव सर्वं तस्माद्वैचित्र्यमेकमुपगम्य ।
वैचित्र्यान्तरमन्याकारविमर्दात्समुल्लसति ॥ ६३ ॥

सूत्रे—सर्वस्य साकारत्वादाकारोपमर्दः सर्वत्र ४–१–२५ ।
न निराकारादाकारोद्भवः पुनरप्यसङ्गादापत्तेः ४–१–२६ ॥

इयमाधिकरणमारभ्यते—

सर्वात्मा चेतनोयं वा स्यादथाचेतनोपि वा ।
भक्तानुग्रहकृत्याद्यैश्चेतनः स्यादसौ स्फुटम् ॥ १ ॥
अस्मिन्नवान्तरो भेदश्चेतनाचेतनाभिधः ।
तस्मादस्मिन्विकल्पोयं सर्वथैवासमञ्जसः ॥ २ ॥

सूत्र—अवान्तरभिदा चेतनाचेतनाख्या ४–१–२७ । चेतनस्योपायविकल्पा नत्वचेतनस्य ४–१–२८ ॥

---

साकारस्योद्भूतिर्न निराकारात्कथञ्चित्स्यात् ।
एवं स्वीकारे स्यादसत्समुद्भवकथा यस्मात् ॥ ६५ ॥
(अ० १०) प्रकृतौ साकाराणां किञ्चिच्चेतनमचेतनं तु परम् ।
कृत्स्नाणां न प्रकृतौ चेतनता सद्विपर्ययोप्यथवा ॥ ६५ ॥
यस्योपायविकल्पस्सञ्चेतनमभिमतं विदुषाम् ।
यस्य तु मियतैव गतिस्तदचेतनमिष्यते जगति ॥ ६६ ॥
अवसोवस्कान्तं प्रति ऋजुरेवैका गतिर्नियता ।
मतु पार्श्वतो विभङ्घनमवान्तरस्थस्य तत्कुरुते ॥ ६७ ॥
तस्मादचेतनं सत्पियतीलक्षचेतनस्तु मतः ।
योदृष्टान्त्यकणं गतिघतमवलम्ब्य यत्नेन ॥ ६८ ॥
अंगारादेरुचिते योगे सति ओजपुद्गले जाते ।
उल्लसति चेतनेयं नश्यति पुद्गलविघटने च ॥ ६९ ॥

एकादशाधिकरणमारभ्यते—

जन्मान्तराद्यदृष्टस्य दैवाख्या वा परस्य वा ।
दैवं जन्मान्तरादृष्टं तद्धीनाश्च अन्तवः ॥ १ ॥
अयत्नसिद्धं दैव स्याद्यत्नः स्यादिह पौरुषम् ।
फलमेतद्द्वयाधीनं निश्चितं सुधियामिदम् ॥ २ ॥

सूत्राणि—भूतभवतामयत्नसिद्धानां यत्नस्य च फलं भावि ४-१-२९ । अयत्नसिद्धं दैवं यत्नः पुरुषकारः ४-१-३० । उभयमपेक्षितं सर्वत्र ४-१-३१ ॥

---

सा बुद्धिर्वस्तुसार्कत्ति-शक्तिमयी केन्द्रमात्मीयम् ।

गच्छति निजेधिकारे यद्यात्मकर्मं खिलद्वायत्ता ॥ ७० ॥
(अ० ११) भूतं भवच्च यावत्तदयत्नोपनतमेव स्यात् ।
दैवमथ पुरुषकारो यत्नः फलमेतयोर्भाति ॥ ७१ ॥
चेतनमचेतनं च प्रकृतावुभयं यतो दृष्टम् ।
न च सर्वत्रः कश्चिद्विभाव्यते सर्वशक्तिर्वा ॥ ७२ ॥
नियता नतु विनियम्या प्रकृतिर्दृष्टा यतश्चेष्टा ।
तस्मात्प्रकृतेर्भिन्नो न नियन्तास्त्यास्तु कोऽप्यस्ति ॥ ७३ ॥
यावच्च भक्तवर्गः पार्थनया वन्त सूर्यगतिम् ।
रोधयति तावत्तस्या न नियन्ताऽन्योनुमेयः स्यात् ॥ ७४ ॥
बहिर्दृष्टन्यथेच्छं गिरिकाननपुरवरग्रामान् ।
अनियन्तृको नियन्ता यत्ते चुल्लीमुखे वह्निः ॥ ७५ ॥
चुल्लीनियम्यवह्नेरिव सूर्यादेस्तु भक्तानाम् ।
प्रत्यक्षदर्शनीयः कार्यवशाद्वेत्ति नियमः स्यात् ॥ ७६ ॥

द्वादशाधिकरणमारभ्यते—

ज्ञानं परमहंसानां मूर्च्छाद्यैरद्भुतं नवा ।
मूर्च्छाद्यैरद्भुतं ज्ञानं दृष्टमेव महात्मनाम् ॥ १ ॥
मूर्च्छाया ज्ञानशत्रुत्वं योगस्त्ववहितिर्मता ।
तत्तत्कार्ये फलोत्कर्षो योगादित्यतिरोहितम् ॥ २ ॥

सूत्राणि—योगमूर्च्छासमाध्यादि न संभाव्यं सर्वत्र संभवे

---

नूनं तदाभ्युपेयो विनियन्ताऽन्यः प्रकृत्याः स्यात् ।
प्रह्लादादिकथाभ्यो न पुनर्विनियामकानुमितिः ॥ ७७ ॥
पत्युरसामञ्जस्यात्कर्तृत्वश्चेत्यादि कथयंस्तत् ।
अभ्युपगच्छति युक्तिभिरपि भगवान्बादरायणः स्पष्टम् ॥ ७८ ॥
अंशोह्ययत्नसिद्धो यत्नश्चापेक्षितं कार्ये ।
प्रथमो न स्वाधीनः कार्यं तस्माद्द्वितीयेन ॥ ७९ ॥
(अ० १२) व्याधिरपस्मारादिर्भवणमहिफेनमुख्यानाम् ।
गरलानां च निमित्तं मूर्च्छाया लिङ्गवत्तु मतम् ॥ ८० ॥
ईदृङ्मूर्च्छादि अत्रे संभाव्यं नैव सर्वत्र ।
यत्र तु दृष्टं तेषां न धीप्रकर्षाद्भुतो दृष्टः ॥ ८१ ॥
योगस्तु चित्तवृत्तेर्निरुध्य कुत्रापि संगमनम् ।
अवधानेनाभिधं प्राणायामादि साधनं तस्य ॥ ८२ ॥
सत्यवधानेच्छात्रोभ्यासाद्भावादि जायते ।
मेष्ठी मूलधनस्योपयोगतो बहु धनं भजते ॥ ८३ ॥
अन्येऽप्येवमवस्थिताः स्वं स्वं कार्यं विधाय साफल्यम् ।
यान्ति प्रकृष्टमेतद्विदुषामतिरोहितं सर्वम् ॥ ८४ ॥

वा निष्फलम् ४-१-३२ । योगश्चित्तवृत्तिनिरोध इति पतंजलिः ४-१-३३ । तस्याप्रधानरूपत्वात्सति तस्मिंस्तत्तत्कार्ये फलोत्कर्षः ४-१-३४ । प्राणायामाद्यप्रधानमात्रसाधनम् ४-१-३५ । समाधिस्तन्मयत्वम् ४-१-३६ । तमहश्चेष्टायोगप्रधानानामुत्तरोत्तरमुत्कर्षः ४-१-३७ ॥

---

न पुनः प्राणनिरोधादपि वा मूर्छागमेन जनः
पठनं त्रिनेत्र विदुान्मूलधनाद्यन्तरेण धनिकं वा ॥ ८५ ॥
योगोऽप्रधानमात्रं तस्य विशेषः समाधिः स्यात् ।
स च तन्मयत्वरूपः परः प्रकर्षोऽप्रधानस्य ॥ ८६ ॥
मूर्छाकारः मूर्छां कुर्वन्त्यरयात्रया गतया ।
प्राज्ञैकहास्तिकतीर्थयात्रिकसंमतयापि नाद्रियः ॥ ८५ ॥
मोघं तस्य समाधिस्तेन महत्कर्मसाफल्यम् ।
योगं कर्मसु कौशलमाहुर्जुनसारथिर्भगवान् ॥ ८८ ॥
किञ्चिद्वाल्यमतीतस्तन्द्रां बहु मन्यते प्रायः ।
शयनासनादिसौख्यं वाञ्छत्युद्योगमन्तरेण सदा ॥ ८९ ॥
दुःखाद्यत्नभयाद्वा यदि वाञ्छत्युद्यमं तु तदा ।
छलयष्टनं बहु मनुते न पुनः कष्टं गुरोः वासम् ॥ ९० ॥
विद्यामधिगच्छत्यपि पुस्तकणकठिनमुखोच्चकैश्चान् ।
रटति प्रायो रसनामर्दनिघं खेदयन्मूढः ॥ ९१ ॥
कश्चित्तीव्रो मनसावस्थितेन पदे पदे सत्त्वम् ।
भूयः परीक्षमाणः सुमहोद्योगः प्रयाति विज्ञत्वम् ॥ ९२ ॥

अथोटशाधिकरणमारभ्यते-

कीलनं किल शापो वा मन्त्राणां वार्थविस्मृतिः ।
शापः स्यात्कीलनं तद्धि प्रसिद्धं मन्त्रवेदिनाम् ॥ १ ॥
शापादि कल्पनामात्रं कीलनं त्वर्थविस्मृतिः ।
विषाद्यनुपयोगो वा राजदण्डादिभीतितः ॥ २ ॥

---

विघ्नाने पत्यूहा लोभाद्याः सुखहयत्नेषु ।
सुमहान्त्यत्यूहोघं भक्तिर्या सिद्धकितवेषु ॥ ९३ ॥
हिमगिरिशिखरे दृष्टान्कलाकुमारिरपि प्रायः ।
अत्रेपरमाणुरन्ध-प्रवेशकुशलान्महासिद्धान् ॥ ९४ ॥
सप्तर्षिमण्डलाद्यं मक्षसोद्धोय क्षमान्सम्यक्षुम् ।
योगर्धिशेषलेशाद्दुर्वं शान्तक्षुधायेगान् ॥ ९५ ॥
सिद्धपुरं धर्मपथेष्वयत्रा बालान्त्विमूर्छयितुम ।
कुशलान्याश्चान्यविदः पेतापशाचाटदर्शने कृतिनः ॥ ९६ ॥
विकटाः पेटाः काश्चित्कृष्णाद्यवतारकुशला वा ।
स्थविरभूकुंसविटाद्याम पुनरात्मरूपेण ॥ ९७ ॥
भ्रमणित्नमवनं। शक्तान्त्यर्पटिश्य क्षणेषु मुग्धेषु ।
सर्वत्र विद्याक्षेत्रे सिद्धिवभूतिषु कविं च कविरासु ॥ ९८ ॥
इत्याहुर्यन्ति मन्त्रज्ञं शिल्पं शास्त्रं च नास्तिकम् ।
उक्तेः प्रघोषवन्तः शिशुनाशायेव लब्धजन्मानः ॥ ९९ ॥
( अ. १३ ) अर्वाचीने यदुद्रमशास्त्रे मातृकाभिरिह ।
वैज्ञानां व्यवहारस्तथा चिरत्नेपि तन्त्रादौ ॥ १०० ॥

सूत्रे-सांकेतिकानां रसादिबीजत्वमुक्तमर्वाचीनस्य रस-शास्त्रं ४-१-३८। तद्विस्मृतिः कीलनं स्मरणे वानुपयोगः प्रशास्त-कानां विज्ञतरत्वे ४-१-३९ ॥

इति चतुर्थाध्यायस्य प्रथमाह्निकम् ॥

---

कैरलरैः पुनः किं गरलाद्भुतं न तस्मरन्त्यधुना ।
तस्मात्कालनदग्धान्यन्यान्यवदन्ति मान्त्रिका मुग्धाः ॥ १०१ ॥
अथ योगचूर्णमुग्रं यत्कल्पितमभयदत्तसाद्यैः ।
ज्ञातेऽपि फलं किं तेनारिषु क्षुत्त क्षितेषु ॥ १०२ ॥
मूर्खा हि राजपुरुषा यदा कदाचिद्भवन्ति सम्प्रति ।
धूर्ता मन्त्रजमूलुर्विषकृतमपि मारणादि तदा ॥ १०३ ॥
अत्र तु चाणक्यादपि विज्ञतरेषु प्रशास्तृषु ।
कुर्वन्त्विहादियोगं प्रायः किमतो निरङ्कुशेन ॥ १०४ ॥
इति कांश्चिदान्ध्य मन्त्रान्व्यर्थादर्शयति तथापि मूर्खेषु ।
यान्यपु मन्त्रशक्ति प्रथयति गोल्लिकजनाज्ञातः ॥ १०५ ॥
धृष्टास्तु केचिदधुनापि मदासभासु
धर्मोपदेशगतराजभयाः सदर्पम् ।
उद्घोषयन्ति महतीं ध्वनिभावनादेः
विख्यातकाटिजननीं महनीयशक्तिम् ॥ १०६ ॥
दूरेण तान्परिहरन्त्विह कालकूट-दृष्टानिव प्रवरतः स्थितुमाशयाय ।
मोहं निरस्य सुमतिः सततप्रमत्तः स्यात्प्रत्यवायविषसंपदि विश्वजाती ॥ १०७ ॥

इति चतुर्थाध्यायस्य प्रथमाह्निकम् ।

# चतुर्थाध्याये द्वितीयाह्निकम् ।

चतुर्थाध्याये द्वितीयाह्निके प्रथमाधिकरणमारचयति-

कायेन समवेतौ वा सूक्ष्मजीवौ युतौ तु वा ।
परलोकादिगमनाद्युतौ स्यातामिमौ स्फुटम् ॥ १ ॥
उत्क्रमादेरसिद्धत्वात्तयोः पृथगदर्शनात् ।
कायेन समवेतौ तु सूक्ष्मजीवाविति स्थितम् ॥ २ ॥

सूत्राणि-शरीरभेदाज्जीवभेदः ४-२-१ । शरीरात्मनोरयुतसिद्धिर्ज्ञे सिद्धयोर्योगः ४-२-२ । अयुतसिद्धिरभेदो बादरायणादीनाम् ४-२-३ । तथा सूक्ष्मस्य ४-२-४ । नोत्क्रमणं विज्ञानात्मनः सूक्ष्मस्य वा तथा च याज्ञवल्क्यः ४-२-५ ॥

द्वितीयाधिकरणमारचयति-

परिणामितया भूम्न उच्छित्तिः संभवेन्न वा ।
उच्छित्तिः संभवेदेव परिणामात्प्रकल्पिता ॥ १ ॥

---

( अ. १ ) शरीरभेदादिह जीवभेदो भेदस्य किं स्यादपरं प्रवोढृ ।
कायद्वये स्याद्यदि जीव एको ब्रह्मैव सर्वात्मकमेतदस्तु ॥ १ ॥
कायात्मनोर्नैव पृथक्प्रसिद्धिर्न सिद्धयोर्योग इहानयोस्तत् ।
विनिश्चितैषायुतसिद्धिरस्मात्तर्कप्रपञ्चेस्तु किमत्र मुक्तैः ॥ २ ॥
यौ नाममात्रेण पृथक्पदार्थौ प्रकल्पितौ तार्किकमुग्धबुद्धिभिः ।
तयोः प्रसिद्धायुतसिद्धिरस्माच्च तद्वतोर्वास्तवभेदमाहुः ॥ ३ ॥
पृथक्शरीराच्च यथात्मतत्त्वं तथैव चित्तादिमयोऽपि सूक्ष्मः ।
एवङ्न तस्मात्समवैत्य एव तस्मिन्निति स्पष्टमुशन्ति सन्तः ॥ ४ ॥

सर्वस्य परिणामित्व स्सर्वोच्छेदाद्यदर्शनात् ।
उच्छित्तिः संभवेत्कैव कदापि सकलात्मनः ॥ २ ॥"

सूत्राणि- अविनाश्यनुच्छित्तिधर्मा सर्वात्मा ४-२-६ । तस्मिन्परिणामादि ४-२-७ । नोच्छित्तिस्ततोनुमेया प्रतिबन्धाभ्रहात् ४-२-८ ॥

तृतीयाधिकरणमारभ्यते-

शब्दावलम्बाद्भेदाय जनेषु च परिग्रहः ।
परलोकगमस्यास्तु न वा, सोस्तु सतां मतः ॥ १ ॥

स्वप्ने विनष्टे न हि तस्य दृष्ट्यमुत्क्रम्य कुत्रापि गतिः प्रयाति ।
तथैव सूक्ष्मस्य न चात्मनोपि बहिर्गमः स्याद्विलये शरीरे ॥ ५ ॥
नान्येव विज्ञानघनोनु नश्यत्यत्रासर्वानुत्क्रमिणस्मृतेति ।
मन्त्रोक्तिगाढां गिरमुज्जगार मन्थर्षिधुर्यो ननु याज्ञवल्क्यः ॥ ६ ॥

( अ. २ ) सोयस्य कायानुविनाशितास्मात्सर्वात्मनः शाश्वतता मतौ तु
सनातनः सर्वगतोयमात्मा धमञ्जयत्यञ्जनभूषणोक्तः ॥ ७ ॥
अस्मिंश्च सर्वात्मनि चित्समुद्रे सद्विस्तरङ्गाम्बरपूरपूर्णे ।
कायावधावर्त्तिनि भूरिसारा-फेनाञ्चिते प्राणिसहस्रवासे ॥ ८ ॥
नसद्बुदोपपद्यैतुजातप्रवाहजालोपचितान्तराले ।
शश्वद्बुदन्तोः परिणामधारा वहन्ति संसारततोरवाराः ॥ ९ ॥
तत्तं तदेतत्परिणामि नित्यं दृष्टं हि नात्मापरिणामि किंचित् ।
सर्वात्मनोच्छित्तिरसंभवैव कस्यापि सर्वात्मनि सा कथं स्यात् ॥ १० ॥
नश्येत्स्विशेषः परिणाममेति परे विशेषे सुधियां स्फुटं तत् ।
इदं तु नित्या परिणामधारा संसारसारांनिधिरेतदात्मा ॥ ११ ॥

अर्थवादे न शब्दस्य प्रामाण्यं धर्मवादिनाम् ।
स्वस्वधर्मस्य च श्रैष्ठ्यादव्यर्थो लोकपरिग्रहः ॥ २ ॥

सूत्राणि–न शब्दविरोधः शब्दस्य विधिमात्रे प्रामाण्यात् ४–२–९ । अभेदो वेश्यास्त्रिदुषोः शब्दावलम्बेन परलोकस्त्रीकर्तुः ४–२–१० । न शिक्षादित्यागो निष्कारणधर्मावलम्बिनाम् ४–२–११ ॥

---

( अ. ३ ) जीवस्य कायानुविनाशिता या शब्दोऽपि दृष्टः पतिपादयंस्ताम् ।
शब्दैर्विरोधेऽपि परैर्न हानिर्विधौ हि शब्दो भवति प्रमाणम् ॥ १२ ॥
शब्दोत्थमाख्याटथवाभ्युपेत्य जीवस्य नाकादिगमं महात्मन् ।
शब्दः प्रमाणं तव पूर्वजानां नैवापरेषामिति कोऽत्र हेतुः ॥ १३ ॥
धर्मान्तरीया अपि तत्र धर्ममेव वदन्ति शश्वच्चिरस्य हेतुम् ।
धर्मान्तराणि प्रथयस्यजस्रं त्वं चासिदृप्तो विनिपातहेतून् ॥ १४ ॥
भवन्मते प्रथयत्रिलासिनीनां वासाय घोरो निरयः परत्र ।
धर्मान्तरीया अथ ता भवन्तं दिदृक्षमाणा निरयेऽतितुष्टाः ॥ १५
स्वर्गाधिकारी स्वमतेन सर्वः परैः प्रपञ्चो नरकाधिकारी ।
कस्यार्थवादेषु तदीदृशेषु शब्दः प्रमाणं भविता जनस्य ॥ १६ ।
स्वर्गाद्यभावेऽपि शिक्षादिकस्य त्यागो न निष्कारणधर्मभाजाम्
तद्दित्सयेशाय सुरस्त्रियो या तत्रास्य निर्वेदमुपेतु मोक्षः ॥ १७ ॥
( अ. ४ ) सर्वात्मके ब्रह्मणि कायदृष्टिर्विपत्समेषे किल नालिकेर ।
सूचीप्रचारस्त्वनलस्त्रिकस्य कायानुगा राजति जीवशक्तिः ॥ १८
विपत्समं स्थाणु च सर्वगं च देहात्मकं ब्रह्म परेतु देहम्
शरीरमेतच्चनु नालिकेर शौर्यत्यजस्रं गमनं न तस्य ॥ १९ ॥

धनुर्थाधिकरणमारभ्यते-

भूम्नः कार्यस्य जीवस्य कस्यात्यस्त्युत्क्रमो नवा ।
अस्तु कस्यापि वस्त्वादित्यागौपम्यस्य दर्शनात् ॥ १ ॥

भूम्नः सर्वात्मकत्वं यच्छरीरं तु विशीर्यति ।
शरीरानुविनाशी च जीवः कस्योत्क्रमोऽस्त्वतः ॥ २ ॥

सूत्राणि-ब्रह्म शरीरं जीव इत्याकाशो नालिका सूक्ष्मीप्रचार-नादादीतिवत् ४-२-१२ । न ब्रह्म शरीरान्तरमायात्याकाशवद्विभु नित्यं स्थाणु ४-२-१३ । शरीरं शीर्यति तस्य हि तन्निरुक्तम् ४-१-१४ जीवः पुञ्जोद्भवत्वात्साम्नति पुञ्जे ॥ ४-२-१५ ॥

---

पुञ्जोद्भवत्वात्साम्नेति क्व जीवः पुञ्जे विशीर्णां निधनस्य काले ।
नाशुं व्रजन्त्यां वपुषि नालिकायां तस्याः स्वनं चुम्बति नालिकान्या ॥२०॥
उद्गीथ आ प्रेतविशाखरूपः स्वनो न कुञ्जे गिरिगह्वरे च ।
कूजत्यसौ नालिकया वियुक्तो रामो विदेहाधिपकन्ययेव ॥ २१ ॥

( अ. ५ ) सर्वात्मनो बिम्बसमानसत्त्वोद्भवस्य तस्य प्रतिबिम्ब एषः ।
शरीरमात्रार्थनिभं तथेदं ततोऽपि जन्मान्तरवाञ्च जीवः ॥ २२ ॥
बिम्बप्रकाशोपमयास्य धात्रचाद्यर्थमत्यं प्रतिबिम्बविग्रहः ।
नैवोपलब्धो न तथैव जीवो मनाक्छरीरादपरं प्रयाति ॥ २३ ॥
स ह्यग्निशोत्थेऽपि गवाक्षरन्ध्रा परिस्फुटं पञ्जरपेक्षयत्वा ।
जीवोऽभविष्यद्यदि हन्त तस्य तदैव जन्मान्तरमप्यसेत्स्यत् ॥ २४ ॥
योगी परो ह्यात्मशरीरजोद्यादात्मानमुद्धृत्य परत्र याति ।
न दर्शयेत्तेन कथापदार्थैः पृथक्कृतं जात्मानमथेतु तावत् ॥ २५ ॥

पञ्चमाधिकरणमारचयति-

जीवस्य प्रतिबिम्बत्वे भवेत्तस्योत्क्रमो न वा ।
भवेदेवोत्क्रमस्तस्य भिक्षवोपि तथा विदुः ॥ १ ॥
आदर्शनाशे नाशो हि प्रतिबिम्बस्य दृश्यते ।
तस्मान्न प्रतिबिम्बत्वेप्युत्क्रमः किल सिध्यति ॥ २ ॥

सूत्रे-मुकुरप्रतिबिम्बवद्वा ४-२-१६ । शरीरान्तरगो हि पिशाचवत्पञ्जरपक्षिवद्वा ४-२-१७ ॥

षष्ठाधिकरणमारचयति-

स्तन्यच्यूषणशक्त्यादि पैतृकं वान्यजन्मजम्
जन्मान्तराभ्यासजं तत्स्फुरमुक्त मनीषिभिः ॥ १ ॥
पैतृकं तु मनुष्यादाकृतिवत्तन्मसङ्गजम् ।
बलं तदर्थं जीवस्य जन्मान्तरविकल्पनैः ॥ २ ॥

सूत्रम्—न पूर्वजन्मसंस्कारः पूर्वजशरीरस्त्वयस्कान्तवत् ४-२-१८ ॥

---

ब्रह्मैकरूपे न विशेषभावे न चापि बिम्बप्रतिबिम्बभावे ।
जीवः शरीरं विकृतं विहाय गन्तुं शरीरान्तरमत्र शक्तः ॥ २६ ॥
(अ० ६) स्तनन्धये स्तन्यविचूषणादिर्नैसर्गिको जन्मान्तरसंस्क्रिया सा ।
मनुष्यरूपादिविभागतोसौ दायस्तु तस्मिन्निजपूर्वजेभ्यः ॥ २७ ॥
पित्र्यान्मजोपैति गुणानवस्था कृतैर्विशेषैः सह नात्र शङ्का ।
पवर्तिनो दीप इह प्रदीपान्नान्यस्य दधाति नूनम् ॥ २८ ॥

अथ प्रमाणिकरणमारभ्यते-

भोगोवशिष्टो जीवस्य स्वर्गादौ संभवेत्र वा ।
संभवेदेव नाशः स्यात्किमभुक्तस्य कर्मणः ॥ १ ॥
साक्षाद्भोगः शरीरेत्र तत्संसर्गात्परेषु च ।
ज्ञानिनोपि ह्यमुक्तिः स्याज्जन्मान्तरविकल्पने ॥ २

---

शैत्यादिसंयोगवशाद्विठानीं ज्ञानः स्तनं यो न विशेदृजासंः ।
दृष्टेपि शैत्यप्रभवो निमित्ते सर्कस्तदर्थे किमु पूर्वजासंः ॥ २८ ॥
( अ० ७ ) भोगोपि साक्षादिह कर्मणः स्यादेकत्र जन्मन्यखिलस्य नूनम् ।
भोगस्तु पारम्पारकः सुतादेः स्फुटस्तदर्थं परजन्मनालम् ॥ ३० ॥
यस्यावशिष्टं निधने फलं तु परत्र भोगो न समञ्जसोस्य ।
स्याद्वो हि पापस्मरणं स्मृतिश्च न पूर्वजासंकलभ्यतत्र ॥ ३१ ॥
सुरां पिबन्यो मिषते न तस्य पाकः सुरायां न मदोपि दृष्टः ।
मतस्य पाको न यथा मदो वा तथैव पापं न सुराफलेहात् ॥ ३२ ॥
वराजन्मादि न कल्पयन्ति दण्डं मुधा दुर्धिय एव नूनम् ।
पौत्रिर्वराकस्य यथा स्वभोज्यं तथाज्यवानेपि मठाधिपस्य ॥ ३३ ॥
अभुक्तमत्राथ कृतं परत्र फलं ददातीति कुतर्कणा ते ।
मद्यैन लीढेन मतिक्षणेपि मदः प्रवक्ष्यो निलये सुराणाम् ॥ ३४ ॥
अनादिजन्मान्तरकर्मराशेरनन्तजन्मान्तरभोग्यता चेत् ।
ज्ञानेपि मुक्तिर्भवितान पुंसामन्यादृशं ज्ञानफलाच्च सत्यम् ॥ ३५ ॥
क्षीणा अनेके किल पौत्रतुल्याः कार्येषु चैत्यस्करसन्निभेषु ।
स्वर्गादिभोगो यदि कर्मराशिर्मुक्तिः खपुष्पप्रतिमा सदासौ ॥ ३६ ॥

सूत्राणि–साक्षान्नोगस्त्वेकेनैव जन्मना ४–२–१६ । पारम्पर्यिकः संसर्गात् ४–२–२० । आमुष्मिकभोगकल्पने मुक्त्यभावः ४–२–२१ । सुहृदादौ संक्रम इति चेन्निधते सर्वेषामविशेषः ४–२–२२ ॥

अष्टमाधिकरणमारचयति–

स्वर्गादिकल्पना धर्मे जनान्वर्त्तयते न वा ।
नरकस्य भयात्स्वर्ग-लोभाद्धर्मे जनो भजेत् ॥ १ ॥

'क्वापुत्रे संक्रामति कर्म सख्यो पितो सुते वा यदि मत्युकाले ।
सर्वस्य संक्रामति कर्म जन्तोः कथं न तद्विधनाविशेषात् ॥ ३७ ॥
स्वर्गोपि मिथ्या नरकोपि मिथ्या ब्रह्मैव जीवः सततार्द्वतोयः ।
मिथ्या पुनर्जन्मविकल्पनेन जनान्कथं मुञ्चयतीह भिक्षुः ॥ ३८ ॥
मृष्यमानस्य गुणाविशेषो नाध्यापिनोति स्फुटमाह भिक्षुः ।
किमेव सत्कानरसां सुधानः कदापि जीवस्य गतिं प्रयक्ति ॥ ३९ ॥
अन्नस्य रम्भापरिरम्भलोभः कम्यस्तथा वैतरणीकषायैः ।
लोभेन रम्याधिगमो न सम्य क्लेशेन वा वैतरणीप्लवाक्ष ॥ ४० ॥
मन्त्रोसजं घोरफणोपि गृह्णात्युत्सृष्टं स्थूलजनोपि जानन् ।
कश्चः पक्वमेव मुखं वहेद्वा न भिक्षते तु सगुलुक्षवो वा ॥ ४१ ॥
शास्त्रेण वाक्यं परमार्थतत्त्वं भ्रमेण किं कीदृगिति प्रवक्ष्य
कस्यापि शक्तिः परमार्थ एको भ्रमास्तु नैके नियता न चैते ॥ ४२ ॥'
नरे नरत्वं नरशास्त्रवाक्यं भ्रमेण सस्मिन्खरनाश्वमा वा ।'
के के भ्रमाः क्वत्र नरे भवन्ति कस्तत्प्रवक्तुं प्रयतेत विद्वान् ॥ ४३ ॥

स्वर्गादिवादिनामत्र मठमन्दिरभूमिषु ।
महापातकभूयस्त्वात्कल्पना साधकोत्तमो ॥ २ ॥

सूत्राणि-कल्पना नाकनिरयादीनां सदृष्ट्यतिकरात्काकदन्त गिर्याश्रितवत् ४-२-२३ । धर्मे भयार्थमज्ञानामिति केचित् ४-२-२४ तत्परस्वास्तेयमिव रज्जुसर्पसंनिकर्षात् ४-२-२५ ॥

नवमाधिकरणमारभ्यते-

भोगाशामोदकैस्तृप्त्या मूर्खाणां तु सुखं न वा ।
देवाङ्गनादिचिन्ताभिर्मोदस्तेयं विनिश्चितः ॥ १ ॥

---

अन्ध्यासुतं पुत्रवतीसुत च विलिख्य वेसा प्रथमे वयस्यः ।
काये द्वितीयेन निजं करोति पशुः प्रमत्तोपरथा जनोऽसौ ॥ ४४ ॥

अनेकजोषत्वविरोधिनीं चेद्दुस्त्यजां म्यापयतीह भिक्षुः ।
कर्तुं सहोथा अनुवाचिणोऽपि जीवं पुनर्जन्मजुषं वदन्ति ॥ ४५ ॥

अयं दरिद्रो ममतोपमाद्यः फलात्तमिच्छे वचसो वहेति ।
जीवो न जन्मान्तरवान्भमेति सत्येति तुल्ये वचने नयेत ॥ ४६ ॥

( अ. ८ ) तस्माद्विधं काम्यनपत्यतामा पक्षन्यमा स्वर्गिरयादिकानाम् ।
ऊर्ध्वं सुमेरावबलिम्पणीले पूरे पयोधेर्वसुधोदरे वा ॥ ४७ ॥

धर्मे भयार्थे किल बालिशानां कल्पेति तां केवन वोपयन्ति ।
आपातरम्यं सुफलं मनोज्ञमत्र स्मरन्तः प्रतिरोधयन्ते ॥ ४८ ॥

किंपाकिरं रज्जुभुजङ्गमाद्वा बिभ्यत्तदभ्यर्णगतं न बालः ।
मुद्रादिकं स्पृश्यति रोमपुञ्ज्या चोरो न किं म्याकुटयमप्यशौर्यः ॥ ४९ ।
किं चात्र दृष्टः सहभक्तिलक्ष्या स्वर्गादिविश्वासपरोऽनपायी ।
पापं न सत्यदृष्टिसेन यस्य न क्षेत्रमाद्यां सकृदेव नश्येत् ॥ ५० ॥

यथा स्वर्गस्य चिन्ताभिः सुखं नरकचिन्तया ।
दुःखं तेषां तथा नातः स्वर्गस्याभ्युपयोगिता ॥ २ ॥

सूत्राणि—वर्षशतेनाप्यतृप्तस्य ततोऽप्यवपतरायुषो भोगाधे-
त्यग्ये ४-२-२५ । दुःखाशापि ४-२-२७ । पर्याप्तमायुर्ज्ञानवतः
कार्यशेषस्यापरैरनुष्ठेयत्वात् ४-२-२८ । न तस्य लोकलि-
प्सा ४-२-२९ ॥

इदमधिकरणमारभन्ते-

अत्युक्तिरेव स्वर्गादिस्तत्त्वं किञ्चिदिहास्ति वा ।
केचित् स्वर्गादयो लोकाः संभवन्त्येव वस्तुतः ॥ १ ॥

यः पापराशिः सुरमन्दिरेषु तीर्थेषु वा क्वापि मठेषु वापि ।
स्वर्गादिविश्वासपराङ्मुखाणां वैज्ञानिकानां समितौ क्व तस्य'त् । ५१॥
गुरुं न धर्मस्य भयेन नारा स्वदूषणायोद्यतमाह किंचित् ।
प्रच्छाद्य धर्मस्य च वञ्चकेन पापं नृणामादृभयाधरन्ति ॥ ५२ ॥
स्वर्गाय लोभात्सनृशंसकर्मा यत्पातकं हन्त करोति कोऽन्यः ।
स्वर्गादिविश्वासपराङ्मुखस्तु स्वप्नेऽपि तत्पश्यति नैव धीरः ॥ ५३ ॥
( ब. ६ ) यत्पश्यतो वर्षशतेन जन्तोर्भोगाभिलाषात्परलोकवादः ।
वैधव्यदुःखाखिलयौवनाया वेश्यात्यजिन्तेव सुरालयेषु ॥ ५४ ॥
यद्वायकानां व्यभिचारचिन्ता मद्यस्य सेवा कलहश्च यद्वत् ।
स्वर्गाप्तितोयं नरकात्सुघोरात्सुरालयो हन्त सुरालयोसौ ॥ ५५ ॥
सुरालये सौख्यलवानुषक्ताः स्मरन्ति नूनं निरयाघ घोरान् ।
कुतोन्यथा स्वप्नसुरां विलोक्य ध्यात्वा मुहुर्मोहमयी वहन्ति ॥ ५६ ॥

अभाव उत्क्रमस्यैव न दृष्टिः स्वर्गगामिनी ।
तस्मादस्युक्तिरेवैषाभिमता कविकल्पना ॥ २ ॥

सूत्रे-उपलभ्यमानमुक्तदुःखातिशयोक्तिस्तु ४-२-३० ।
मरुकाकाङ्क्षा दृष्टव्यतिकरस्कन्धा सैषोत्प्रेक्षापल्लविता कविता ४-२-३१ ॥

एकादशाधिकरणमारभ्यते-

कर्मणः स्यात्परित्यागः शक्त्या सातत्यमेव वा ।
विरागिणां परित्यागः संभवेदत्र का क्षतिः ॥ १ ॥

ज्ञानामृतक्षालितचेतसां तु पर्याप्तमायुर्मृदुतामियत्त्वम् ।
नेक्षन्ति नाकाम्बरचारिजं ते सख्यस्मि नो वा निरयास्थिजातात् ॥५७॥

यत्कार्यशेषं भुवि किंचिदेषां सुतेन शिष्येण परेण वाऽस्य ।
संभक्ष्यते निर्वपणं न तेस्तु स्वर्नायकैवं निरयस्थितैर्वा ॥ ५८ ॥

(अ० १०) हर्षस्य वैक्ल्यादुपसर्पिणस्य पूतिव्रणादेश्च सदुद्भवस्य ।
अस्थुक्तिरेषा परिकल्पना वा सुराङ्गनावैनतलोपजाता ॥ ५९ ॥

विध्यर्थवादाद्यविवेकलोला यद्वावलम्ब्याम्बुभरेण सिक्ता ।
सारण्ढाढी नरकपणं यत्तद्गुरा दृष्टसुखादिकस्य ॥ ६० ॥

अस्थुक्तिभिः स्वस्थवसौ कवीनामुत्प्रेक्षया पल्लविता विधात्रा ।
अवत्वपर्यटजनविप्रभूमौ विराय सा हन्त विडम्बनूना ॥ ६१ ॥

अनाद्यविद्याव्यसनेन विप्र-शस्त्रेण सा तीव्रहठेन कृत्ता ।
अस्वस्थरोद्यास्थुसभुक्तिवल्ली भस्मीभवल्लोमवलीव तुष्टः ॥ ६२ ॥

तटेऽर्धवृत्ता परिशीर्यमाणं विज्ञानमारब्धति विप्रलोकः ।
विद्याभाजा क्रमशो भविष्यो संपन्नमाहुस्तं महर्षिं येन ॥ ६३ ॥

नासेोन्मादसमोज्ञानां विरागो मौर्ख्यमूलकः ।
तस्मात्तु कर्मसातत्यं यथाशक्ति हितं मतम् ॥ २ ॥

सूत्राणि-इह कर्मसातत्यम् ४-२-३२ । तद्भक्तिज्ञानमुक्तकं त्रिवर्गफलम् ४-२-३३ । सा जीवन्मुक्तिर्मस्तविरहे ४-२-३४ । संन्यासस्तूर्ध्वबाहुवत् ४-२-३५ ॥

(अ० ९१) अर्थाद्विद्वत्सारहितस्तवित्थं विज्ञानसृष्ट्या जगतः शिवाय ।
दानेन भक्त्या च विशुद्धचित्तः सत्कर्म कुर्यात सदैव साधुः ॥ ६४ ॥
यद्वस्तु यादृक् तदलं तथैव ज्ञान्मनोज्ञो न मार्गभक्तः ।
अनारतं कर्मपरो लभेत धर्मार्थकामान्मनुनोयकीर्त्तिः ॥ ६५ ॥
अयं जनो नैव परस्तु कश्चित्यः स्वार्थमिहं प्रतिपद्य कर्मी ।
भूमानमानन्दमयं भजेण निवेश्य सोल्योयसि जन्यमेति ॥ ६६ ॥
अस्यापि लोकस्य शरीरनाम्नः परस्य लोकस्य च भूमनाम्नः ।
अंशांशिभावं तु विदन्महात्मा सर्वस्य मुक्तः कुशलं करोति ॥ ६७ ॥
न कर्म सर्वात्मनि याति विघ्नं निरञ्जनकर्मा परमाणुरत्र नो ।
स्वकर्मसंन्यासशमनः सुशुद्धयो न रोधयन्ते परमार्थवल्लभाः ॥ ६८ ॥
प्रमादवान्कर्म विधातुमीहते जनस्तु यो भूमनि सर्वकर्मणि ।
स ऊर्ध्वबाहोरिव बाहुरेकः पुरोऽर्ध्वयोगं सुखवद्विशुद्ध्यति ॥ ६९ ॥
इदं हि धर्मार्थसुखस्य साधनं शरीरमाद्यं न ममत्वमत्र च ।
इदं तदेतत्स्वजनात्मनो धनं, विमार्ष्टयेत्स्वैरमकर्मणा सुधीः ॥ ७० ॥

द्वादशाधिकरणमारभ्यते-

निर्वेदात्कायदुःखादि तपः कार्यं न वा बुधैः ।
कार्यं कण्टकशय्यादि तपो निर्वेदमाश्रितैः ॥ १ ॥
कलिदैवादिपैशाच-भ्रममूला विरागिता ।
तस्मात्कण्टकशय्यादि विकर्म परिवर्जयेत् ॥ २ ॥

सूत्राणि-शरीरमाद्यं त्रिवर्गसाधनं न च ममत्वं तत्रापि ४-२-३६ । कण्टकशयनादि कर्माभासः ४-२-३७ । युक्ताहार-

(अ० १२) शरीरमेतत्सकलात्मनो धनं प्रवर्तयेत्सर्वहिते मनुष्यः ।
तथा हि कायस्य धनं करो भवत्सदैव कायस्य हिताय चेष्टते ॥ ७१ ॥
न कर्म संन्यस्य परापवादैर्नजातु शार्दूलबलप्रतर्पणैः ।
न कण्टकास्तरणाद्यपि वा भृकुंसभयहार्षनविभ्रमैर्न वा ॥ ७२ ॥
न वायुतारंभकटर्षनभ्रमैर्न भाक्षमत्वादिसमागमैर्हतैः ।
विकर्मभिर्वा न परिष्ठितार्थवेकरोगमेतत्सकलात्मनो धनम् ॥ ७३ ॥
सुयुक्तमाहारविहारमात्रात्सुयुक्तचेष्टः सकलेषु कर्मसु ।
भजन्सुयुक्तं शयनावबोधनं विवृद्धतेजा यदुराजयोगतः ॥ ७४ ॥
शरीरमेतत्सकलात्मनो धनं हितं नियोक्ष्यन्सकलस्य सन्मतिः ।
विचिन्त्य विज्ञानमधूनि सर्वतः सरस्वतीसद्मसदृक्षमाचरेत् ॥ ७५ ॥
उपचयन्ति शिल्पशास्त्रसङ्गे सुखमिह लोकति सर्व एव लोकः ।
अथ मम निधनेपि सौख्यभाजो ननु मम बन्धव इत्युपैति तोषम् ॥ ७६ ॥
मूर्खेषु नैत्र परितुष्यति भोगजातैर्दारिद्र्यरोगनिलये निरपेक्षसौख्यम् ।
रम्याङ्गसङ्गमसुगन्धसुनार्यकाले दृष्टस्ततैर्वलति चेतसि वीरवाद्यैः ॥ ७७ ॥

विहारतादि वासुदेवस्य ४-२-३८ । कलिदैवायतनतिलोकान्तर-
दिव्यशक्तिपिशाचादिप्रत्यया निर्वेदाभासहेतवः ४ २-३९ ॥

इति चतुर्थाध्याये द्वितीयाह्निकम् ।

---

कलिरयमिह का स्यादुद्यतिर्हन्त जन्तो-
रतिबलवति दैवे पौरुषं किं नु कुर्यात् ।
अयनतिरवराणां निश्चिता पूर्वजेभ्यो
भुवि भवदपि दुःखं शर्मणेमुत्र शश्वत् ॥ ७८ ॥

अनविरत विरक्ता दिव्यशक्त्या प्रबन्धा-
न्कदन मनुजशक्तिस्तादृशानत्र कुर्यात् ।
शिशुजनमिति वादैर्मोहयन्तः समन्ता-
द्विपद इदमधन्यं भारतं नाशयन्ति ॥ ७९ ॥

इति चतुर्थाध्याये द्वितीयाह्निकम्

# पञ्चमाध्यायस्य प्रथमाह्निकम्

पञ्चमाध्याये प्रथमाह्निके प्रथमाधिकरणमारभ्यते-

चितो निषेधसंज्ञीतिविषयत्वं भवेन्न वा ।
सर्वत्र संशये सर्वाभावे वा संभवेदिदम् ॥ १ ॥
संशयो वा निषेधो वानुपलब्धो न संभवेत् ।
उपलब्धिस्वरूपायां संभवो नैतयोर्धितौ ॥ २ ॥

सूत्राणि-ममत्वनाशश्चिदात्मभावात्मको ज्ञानम् । ५-१-१ । चिदक्षपरिमिका न निषेध्या न च संदिग्धा । ५-१-२ । विषेध्य-संदेहयोरपि चिदात्मकत्वात् ५-१-३ ॥

---

(श्र० १) ममता तिरोभवति चन्त यदा सकलात्मता च समुदेति चिया ।
चितिशक्तिरपतिहताथ तदा प्रथते प्रमाठविगमाठमला ॥ १ ॥
अखिलात्मिका चितिरियं सतते परिणामिनी च निजसाक्षितया ।
समवस्थिता च लठिमामबुधाः क्षणिकामथापरिणतिं च विदुः ॥२॥
परिणाममेव सुमता जगदुर्निजसाक्षिता यतिजनाभिमता ।
कटमश्वहस्तिनिभमंचपरि-यद्वयं विमोहयति चन्त जनान् ॥ ३ ॥
चिदियं निषेधविषयो न भवेन्न च संशयस्य विषयः किल सा ।
उभयं चिदात्मकमिदं हि यतश्चितेोऽपरात्मकतयाधिगता ॥४॥
यदि सर्वमस्ति चितिरस्ति सदानुपलब्धिरस्तिविषयो हि कथम् ।
अथ नास्ति सर्वमुपलब्धिरियं न चितिर्निषेधविषयस्तु ततः ॥ ५ ॥

द्वितीयाधिकरणमारभ्यते-

चिदात्मनः परिच्छेदः कथमप्यस्ति वा नवा ।

ज्ञानं नैवापरिच्छिन्नं परिच्छेदः स्फुटस्ततः ॥ १ ॥

उपलब्धिमयादन्यत्किं वा स्यादखिलात्मनः ।

तस्मिन्नंशाः परिच्छिन्ना नास्य तु स्यात्परिच्छिदा ॥ २ ॥

सूत्रे-न परिच्छिन्ना सर्वात्मनः परिच्छेतुरभावात् ५-१-४ ।

तस्यामेकस्यान्येन परिच्छेदो न तस्या अन्येनासंभवात् ५-१-५ ।

---

* यदि संशयस्य विषयोप्यखिलोनुपलभ्य संशयमवैषि कथम् ।

† न चिदात्मनस्तदुपलब्धिमयात्मपलापितुं प्रभवतीह जनः ॥ ६ ॥

विविधोपलब्धिविषयेपि चिदात्मनि नैकधांश इतरं स्पृशति ।

अस्ति खमेभिघटनेकुलयश्चरणं शरीरिण इवैकतनोः ॥ ७ ॥

अत एव भारतमुपावसतोनुपलभ्यमेव ननु सिद्धपुरम् ।

न वहित्रबाष्पशकटादिगमाद्भवतीह यावदनयोर्घटनम् ॥ ८ ॥

न च मानसेष्वपि सदा सकलं सुलभं स्मृतिः प्रभवतीह किल ।

स्मृतिसंस्क्रियादिवशतोंशइह स्फुटमन्य एकमवकर्षति यत् ॥ ९ ॥

प्र. २) अखिलात्मनोन्यदुपलब्धिमयात्परमस्ति न प्रमितिशून्यतया ।

न परिच्छिदा भवति तेन चितेर्न परिच्छिनत्ति हि निजे चिदपि ॥१०॥

इह चिन्मयैंशमपरं तु परः परिविच्छिनत्ति सकलात्मनि यत् ।

स ततो निजप्रमितिकः सकलं पश्यति स्वयमनन्यगतम् ॥ ११ ॥

प्र. ३) समुपैति बुद्बुदतरङ्गनिभं सकलं स्वशक्तिषु चिदम्बुनिधेः ।

प्रविलीयते पुनरिहैव यतः सकलात्मता स्फुटमतोऽस्य ततः ॥ १२ ॥

सप्तमेऽधिकरणमारचयति-

जातु वैचित्र्यमात्रस्य ब्रह्मण्युपरमो नवा ।
निर्वैचित्र्यं ब्रह्म शुद्धं मुक्तौ प्राप्यापि सुप्तितः ॥ १ ॥
सुप्तेष्येकत्र वैचित्र्ये परेषामिह दर्शनात् ।
सृष्टेरनाद्यनन्तत्वाद्ब्रह्म वैचित्र्यवत्सदा ॥ २ ॥

सूत्राणि-स सर्वात्मा शरीरेन्द्रियविषयबुद्ध्यादीनां साक्षी ५-१-६ । तस्मिन्सर्वात्मसमुद्रे शरीराद्यमुदेति लीयते च बुद्बुदादिवत् ५-१-७ । तस्मिन्ननाद्यनन्तं पारमार्थिकं वैचित्र्यम् ५-१-८ । वैचित्र्यविशेषविलोपेप्यपरिच्छिन्नासंख्यवैचित्र्यात्तद्विज्ञानम् ५-१-९ । न हि बुद्बुदविशेषलोपात्तद्बुदो महार्णवः ५-१-१० विशेषाणां कृत्स्नानामुदयस्य विलोपस्य वा यौगपद्याभावाद्वैचित्र्यात्यन्ताभावो नाममात्रम् ५-१-११ ॥

---

परिणामजातमिह यद्विविधं परमार्थसत्तदखिलं न मया ।
चिदमत्वमेतदनवद्यमुपक्रमणावसानमखिलात्मतनौ ॥ १३ ॥
समुदेतु वा विलयमेत्वपि वा परिणाम एक इह सात्वितनौ ।
परिणाममात्रविकरस्तु न सोऽविरतोर्मिकः किल चिदम्बुनिधिः ॥१४॥
उदितिर्विलुप्तिरपि वा युगपत्परिणाममात्रविषयास्तु कथम् ।
परिणामशून्यपरमात्मकथा लयमेतु तेन किल भिक्षुकुले ॥ १५ ॥
न सुषुप्तिमानपि सुषुप्तिमयो भवति प्रलयव्यतिकरस्तु विभुः ।
प्रभवाप्ययव्यतिकरोऽपि तथा भवशून्यता भवतु हन्त कथम् ॥ १६ ॥
चिदमर्त्यमव्ययुररीकृतनामपि वा न भिक्षुरिह चिज्जलधौ ।
प्रभवाप्ययव्यतिकराख्यमयो चिदमत्वमुत्कटमुदञ्चयति ॥ १७ ॥

चतुर्थाधिकरणमारभते-

वैचित्र्यं मायिकं सर्वं पारमार्थिकमेव वा ।
विलोपान्मायिकं सर्वं नहि किञ्चिदनश्वरम् ॥ १ ॥
पारमार्थिकमेवेदं व्याघातरहितं यतः ।
विलोपाद्ध्वस्वसन्नैव न मर्त्यत्वात्सुतो ह्यसन् ॥ २ ॥

सूत्रे-न मायिकमनिर्वाच्यं वैचित्र्यं भिक्षोरिवाद्वैतशुद्धि-विलोपात् ५-१-१२ । विलोपादसदिति चेन्न व्याहतेस्तत्प्रयोजकत्वात् ५-१-१३ ॥

पञ्चमाधिकरणमारभते-

मायानादिरनिर्वाच्या सतोर्व्यतिकरोथ वा ।
असत्त्वनादिरनिर्वाच्या भिक्षवोपि तथा विदुः ॥ १ ॥

(अ. ४) कथमस्तु मायिकमनिर्वचनोचितमङ्ग सर्वमुपलभ्यमिदम् ।
न विचित्रभूयमखिलं जगतोपलपत्रपत्र उद्धतधीः ॥ १८ ॥
घटसच्च तद्भवति जातु न सद्विलक्षणमसत्त्वमिति कस्यचिदः ।
प्रतिभाति संगतमुशन्ति ततः शशशृङ्गसंनिभमसत्सुधियः ॥ १९ ॥
उपलभ्यसत्त्वमिह जात्वपि यत्तदसत्कथं भवतु सत्त्वयुतम् ।
शशशृङ्गबन्ध्यतनुजादिपरं मतमत्र शब्दमयमीदृगसत् ॥ २० ॥
(अ० ५) अथ बन्ध्यभिक्षुवचनैकगतिः क्षमते न या किमपि निर्वचनम् ।
अयि माण्या ननु विदद्भुवना-न्तिदग्धपालमुररीकृतया ॥ २१ ॥
सति कुत्रचिद्घटितरूप्य सतः प्रतिपत्तिरिष्टमिदमध्यसनम् ।
असतस्तु नैव सृति नापि सतोऽसति आसुरिप्रभृति दृष्ट पथितः ॥ २२ ॥

सतोऽत्यंतिकरश्चैषा यस्या नामान्तरं भ्रमः ।
नासतो विद्यते भावो नाभावो विद्यते सतः ॥ २ ॥
सूत्राणि-तस्माज्ज्ञानाद्विमोक्षो न चानिर्मोक्ष्या ५-१-१४ ॥
क्षणिकः प्रमादजः सतोऽत्यंतिकरस्तु सा तथा च वक्ष्यति ५-१-१५।
नासतः सत्यंत्यासो दृष्टः श्रुतो वा ५-१-१६ ॥
षष्ठाधिकरणमारभ्यते-
ज्ञानेपि कर्मसातत्यमुच्छेदः कर्मणोपि वा ।
ज्ञाने कर्म न संभाव्यं भवत्वेतद्दुरन्तया ॥ १ ॥
ज्ञानेपि कर्मसातत्यं न्यायपूर्वन्तु तद्भवेत् ।
नाकर्म वासुदेवस्य जीवन्मुक्तस्य योगिनः ॥ २ ॥

---

न कदापि सत्यति अगद्बुद्धिस्मृतिरप्यमुष्य कथमाविरभूत् ।
अनुभूतपूर्वविषयस्फुरणं विषये परत्र सदा बाध्यसमम् ॥२३॥
यदवैद्य मायिकमिदं निखिलं यदि वेन्द्रजालसदृशं भवति ।
अपरोक्षकोपि भटपेटगतं सकलेन्द्रजालमवगच्छ शिशो ॥२४॥
(अ० ६) ऋतया तवैव किल विश्वतया वसतान्वितः सतु विशस्मुनिधिः ।
अविरुद्धमेतदिह युक्तियुगं तपनस्य तापपरिवर्षणवत् ॥२५॥
अयमप्रमेयनिजबोधनिधिर्ब्रह्मतया ममत्वरहितो नृपवत् ।
अथ विश्व इव ममतां जहते प्रमितात्मतां च भजते विमृशन् ॥२६॥
तनये निजे समममतो जनको न परस्य पुत्रमुपलालयति ।
अथ स प्रजास्वपहृतीं तु भजन्स्वसुते परत्र च समो भवति ॥२७॥
ऋतया तवैव समतां दधतः सततप्रवाहमखिलं वरतः ।
तनुरक्षणं भवति विश्वतया सकलात्मसत्तनुमिमां विदतः ॥२८॥

सूत्राणि-ज्ञानविज्ञानशक्तिमांश्चिदात्मा ५-१-१७। उभयो शाश्वती ५-१-१८। विज्ञानशक्तावुद्रिक्तायां परिच्छिन्नात्मता पित्रादेरिव ५-१-१९। ज्ञानशक्तावुद्रिक्तायामपरिच्छिन्नस्वरूप-परिचयो ममतोच्छेदश्चाधिकरणिकस्येव ५-१-२०। स न्यायपर्यवसायी ५-१-२१। नाकर्म वासुदेवस्य ५-१-२२॥

सप्तमाधिकरणमारचयति-

निर्गुणः प्रकृतेर्भिन्न ईशः प्रकृतिरेव वा।
नियन्ता प्रकृतेः कश्चिन्निर्गुणः संभवत्यसौ ॥ १ ॥

नृपतेः समस्तमवयवगराधिपतिर्यथा न सहतेनुचितम्।
कृतरेतराक्रममनुष्य जने समतां वहंश्च परिपात्यखिलान् ॥२९॥
सकलात्मनः सकलमेव विदन्स्वतनुं परांश्च परिपाति तथा।
कृतथा प्रबुध्य सुभगतिर्जगतः शिवमाचरन्सततमुद्यमवान् ॥३०॥
कृपणोऽवसस्तनुमिमां मम किं परिपोषयामि न परावयवैः।
अथ वा क्षिपामि न मरक्षुमुखे कृपयेति चिन्तयति हन्त कुधीः॥३१॥
स ममत्वदग्धहृदयस्तु जडोन्त्यजवत्परित्यजत तं विबुधाः।
अवतासुरस्य सनवैर्विकलं जगदीदृशैर्निरयपातसहतैः ॥३२॥
वसुदेवसूनुरपि कर्मपरित्यजनं विनिर्वर्तति स योगिवरः॥
जनकादयोपि किल कर्मपरा बभवुस्म सिद्धिमतुलामवनौ ॥३३॥
७) सुखमत्र भूमनि विदन्मुनिधौ न परिष्कटावति सुखं परतम्।
जनयेन जीवत कृशासुलये मयनाङ्गनाप्रणयिनो न सुखम् ॥३४॥

* प्रकृतिर्नियतैवेयं विनियम्या न केनचित् ।
सर्वाकारेश्वराभिज्ञासाक्ष्येण विनिश्चयः ॥ २ ॥

सूत्राणि-स भूमा सुखं नाल्पे सुखमिति सनत्कुमारः ५-१-२३ । स परात्मा सर्वगुणः सर्वाकारः सर्वकामस्तथा च ब्राह्मणम् ५-१-२४ । न निर्गुणो निराकारो वा तस्यात्यन्ताभावरूपत्वात् ५-१-२५ । प्रकृतिः प्रमेयात्मिका सर्वत्र विशेषेषु ५-१-२६ । सामान्यतस्त्वप्रमेया चिदात्मिका ५-१-२७ ॥

अष्टमाधिकरणमारचयति-

भ्रमस्य तत्त्वज्ञानाद्वा लोपाद्वा मुक्तिरिष्यते ।
लोपान्मुक्तिर्न मुक्तौ स्यादनुबन्धो भ्रमस्य हि ॥-१ ॥

---

अखिलात्मकोऽखिलगुणो भगवानखिलाकृतिर्निखिलकामनिधिः ।
स सदात्मकः किल चिदम्बुनिधिः सुखमप्रमेयमिह सर्वमये ॥३५॥
न स निर्गुणो न च निराकृतिरित्यवधारणैः किमपि नास्ति तथा ।
यतिवक्त्रगह्वरनिवासरसा श्रुतिका चिदेति सरणिस्तु गिराम् ॥३६॥
सपरिच्छदा प्रकृतिरंशधिया निखिला तु नं प्रमितिमर्हति सा ।
अपरिच्छदा चितिमयी प्रकृतिर्ब्रह्मणः परात्मसदृशस्य निखिलात्मसमा॥३७॥
पुरुषस्य या प्रकृतिरस्तु भिदा कपिलप्रमाठलहरी मनु सा ।
विविनक्ति हन्त पुरुषं प्रकृतेरतनोर्मुनिर्विबुधराजमिव ॥३८॥
पुरुषा हि बुद्बुदसरङ्गनिभाः प्रकृतौ चिदात्मनि विशेषमयाः ।
सकलात्मनः प्रकृतितः पुरुषाञ्कपिलो विवेक्ष्यति कथं मतिमान् ॥३९॥
( क्र० ८ ) व्यतिभेद यत्र विषयस्य सतो विषयान्तरेण च सता विहतः ।
भ्रम उच्यते मरुमरीचिजल-स्फुटमल्लिकास्रगहिभोगनिभः ॥ ४० ॥

मुक्तिस्तत्त्वावबोधः स्याद्भ्रमबोधोप्रयोजकः ।
सदिग्भ्रमोपि विज्ञातभ्रमः पातं न मुञ्चति ॥ २ ॥

सूत्राणि-तत्त्वेनाज्ञातोव्याहतः सतोव्यतिकरो भ्रमः५-१-२८। सत्यसतस्तद्विपर्ययेण वाध्यासं भिक्षवः ५-१-२९ । भ्रमो ज्ञान-धर्मस्तत्त्वेन धर्मान्तरवज्ज्ञेयः ५-१-३० । लक्षणमप्रमादादज्ञानं च प्रमादात् ५-१-३१ । तस्य तत्त्वेन ज्ञानं मुक्तिः ५-१-३२ ॥ न नियतस्तद्विलोपो न चापेक्षितः ५-१-३३ । कुतो भ्रमः प्रमा-देनेति न चोद्यं न हि दृष्टेनुपपन्नं नाम ५-१-३४ ॥

इति पञ्चमाध्याये प्रथमाह्निकम् ॥

सुप्ति जाग्रतो न च सतोसति वा भ्रम उच्यते स्मरणमप्यसतः ।
नहि संभवत्यसति हेम्नि गिरावपि कस्य हेमगिरिसंभ्रमः ॥ ५१ ॥

भ्रमोपि धर्मविशेष एव तत्त्वतोवगम्य धर्मान्तरवत्समुत्तमाः ।
प्रमाददोषं विनिरस्य ये स्थिताः सदेहमुक्तिं दधते सदेह ते ॥ ५२ ॥

न तत्त्वमेतस्य विदन्ति ये पुनः पतोल्लमाणा मतमुक्तिमायतीम् ।
अवस्थितास्ते निरये तमोमये चिरं विमोक्षे गणना कुतस्तरे ॥ ५३ ॥

भ्रमस्य लोपो नियतो न चाप्यसावपेक्षितस्तत्त्वविदोपि मुक्तये ।
भ्रमो भ्रमत्वेन विनिश्चितः परं ददाति निःश्रेयसमत्र निश्चितम् ॥ ५४॥

जनोनुबध्नत्यपि दिग्भ्रमे यथा दिशोनुमिन्वन्विविधिमदर्शनात् ।
न कार्यहानिं भजते तथा गतिर्भ्रमस्य सर्वस्य मता मनीषिणाम्॥५५॥

कुत उदित इह भ्रमधिषणाभ्यो ननु सकलात्मनि भूमि सान्विते ।
अनुचितमिति नानुयोज्यमेतत्स्फु-मुपलब्धिरबाधितोपपत्तिः ॥ ५६ ॥

इति पञ्चमाध्याये प्रथमाह्निकम् ।

# पञ्चमाध्याये द्वितीयाह्निकम् ।

पञ्चमाध्याये द्वितीयाह्निके पञ्चमाधिकरणमारभ्यते-

मतभेदेषु सर्वेषु श्रद्धा कार्या न वा पुनः ।
सर्वेषां मतभेदानामङ्गीकार्यात्र सत्यता ॥ १ ॥
वस्तुन्येकविधेनेक-मतानां स्याच्च सत्यता ।
मायानिःश्रेण्यतीतोऽस्मादुग्राह्यः सिद्धान्त एककः ॥ २ ॥

सूत्राणि-सा माया निःश्रेणित्रयवती ममताहन्ताद्विपर्यया ५-२-१ । उपनिषत्सिद्धान्तस्तामतीतः ५-२-२ । मतभेदा निःश्रेणिषु ५-२-३ । प्रमातृप्रमेयपृथक्कारः प्रथमा ५-२-४

---

(अ. ९) भ्रमं ममत्वाद्यविद्यैवकर्षिणं वदन्ति मायेति चिरन्तनाः ।
विदुस्तन्निःश्रेणिमिमाममायिकं स्थितं विलङ्घ्योपनिषन्मतं लघु ॥ १ ॥
भ्रमस्य निःश्रेणिषु षण्ण वर्तयङ्गतं मतान्तरेतरद्विषाम् ।
चिराय वह्वाद्यभिराकुलीकृते मनाग्य विज्ञानमथाप्नि भारते ॥ २ ॥
अपोऽवधेयं निजधर्मपुस्तकं जनाममुन्मोन्मतिभूक्षणं विना ।
शरीरजीवाद्यविषु पञ्जरायद्वज-स्थितिं जगद्धर्मितिमाद्यिश्चिन्त्यना ॥ ३ ।
अधीश्वरत्वं पुरुषस्य जन्यविद्वद्वस्यतां सत्त्वधियश्च मन्युताम् ।
जनेषु निर्धार्य मतभ्रमा अमी चरन्ति भूमौ मतवादवल्लभाः ॥ ४ ॥
भ्रमादनात्मो महिषस्य यत्पदं छटेन देहे पतितं सुवाक्छलम् ।
तदेव देवोऽथमिति श्रुतिक्रिताः समर्थयन्तः प्रचरन्ति ग्राम्यिकाः ॥५॥

ब्रह्मस्यान्यतरस्य वा निष्पेषो द्वितीया ५-२-५ । निष्पिष्य कल्पितानां तत्पुरुषीकारे पुरुषविशेषे चिदन्तर्भावस्तृतीया ५-२-६ ॥

द्वितीयाधिकरणमारभ्यते-

पुरुषः प्रकृतिश्चेति द्वैतं सत्यं मृषाथवा ।
सत्यं स्यादुपलभ्यं हि सर्वैर्द्वैतमितीदृशम् ॥ १ ॥
न तत्संभाव्यते सत्यं द्वैतं नायुतसिद्धयोः ।
न द्वैतमस्माज्जैकं वा मिथ्यैकं सद्द्विनाम तत् ॥ २ ॥

सूत्राणि-जातिव्यक्तिवत्प्रकृतिपुरुषभेदं कापिलाः ५-२-७ । न पुरुषो भूतान्येवेति चार्वाकाः ५-२-८ । ब्रह्म निर्गुणं सत्यं जगन्मिथ्येति भिक्षवः ५-२-९ । एते प्रथमायाम् ५-२-१० ॥

---

प्रमादपाप्मानमुदस्य विश्रुतां स्वबन्धुतायाः सततं दिदृक्षवः ।
सरस्वतीस्रोतसि निर्मले पुनर्वगाहमिच्छन्ति महौजसः परे ॥ ६ ॥
स्वधर्मतातं विटदाम्भिकेषु वा भुक्कुसभण्डेषु च भक्तिमातरम् ।
समर्प्य पोटासु च शास्त्रसोदरं कथं न मुग्धो निरये पतिष्यति ॥ ७ ॥
जनेः प्रमातुः सकलात्मनोपि या प्रमेयतः शब्दवशात्पृथक्क्रिया ।
भ्रमस्य माधेति मतस्य साहिमाशतारनिःशेषिरियं प्रकीर्तिता ॥ ८ ॥
पृथक्कृतादंशयुगादिति स्फुटं विशोर्यतः कर्कशतर्कचक्रके ।
द्वयस्य किंवाऽन्यतरस्य संभवो ब्रवन्न निष्पेषणमेत्र धावति ॥ ९ ॥
हठाद्विनिष्पिष्य च तार्किकैः जगत्-सृजादिभिः पुरुषविशेषतां पुनः ।
अथापितैस्तोऽमुपेत्य कुर्वन्विशेषणं भूय इहाभिमा मता ॥ १० ॥
( अ. २ ) विमोहितः शब्दवशेन तार्किकोभ्युपैति जातिं पृथगर्थतो यथा ।
तथा प्रमातृव्यक्तेस्तु वस्तुतो विभिन्नभावात्प्रवदन्ति कापिलाः ॥११॥

तृतीयाधिकरणमारचयति-

अणुविज्ञानमुख्याः स्युः स्वतन्त्राः कणराशयः ।
मनुबद्धाथवैका स्यात्प्रकृतिः कणशालिनी ॥ १ ॥
परम्परा: कणानां स्युः स्वतन्त्रास्तत्र का क्षतिः ।
स्फुटोपलब्धः संघस्तत्स्मात्प्रकृतिरेकिका ॥ २ ॥

सूत्राणि-अनेके जीवाश्चतत्परिमाणा आर्हतानाम् ५-२-११। क्षणिकानि विज्ञानानि सौगतानाम् ५-२-१२ । अनेकेणवोनेके चात्मानः काणादानाम् ५-२-१३ । एते द्वितीयायाम् ५-२-१४ ॥

चतुर्थाधिकरणमारचयति-

सर्वात्मनोवतारादि-परिच्छेदो भवेन्न वा ।
अमुष्य सर्वशक्तित्वात्स्यात्कथं न परिच्छिदा ॥ १ ॥

---

प्रहस्य केवं कपिलाणुवादिभिः प्रवर्त्तितं द्वैतमसत् तथात्वतम् ।
न पुंसि चाचांक्रमतश्चिलक्षणा रसा तथाप्ति भूतेषु च भक्तिमुत्तमाम् ॥१३॥
पुमांसमेकं प्रवदन्ति भिक्षवो जगन्मृषेत्यभ्युपवर्ण्यं च स्फुटम् ।
इति त्रयस्ते प्रथमानुपासते भ्रमस्य निःशेषिमवादिनभ्रमाः ॥ १३ ॥

( श्र. ३ ) विदन्ति तत्तत्परिमाणमार्हता समाश्रवा जीवमनेकमूर्जितम् ।
समाश्रयन्ति क्षणिकांश्च सौगता मतांधयो विस्तिलवान्यथाहिताः ॥१४॥
अणूंश्चनेकानथ चात्मनो बहूनुपासते काणभुजा बलान्विताः ।
अपो द्वितीयामिति वादिनः क्षिता भ्रमस्य निःशेषिमवान्तविभ्रमाः ॥१५॥

( श्र. ४ ) अधोर्ध्वलोकेषु वदन्त ईश्वरं वहन्ति मोहं किल दैवतस्मयाः ।
समेत मत्स्यादिविशेषकर्षिणं विदुस्तु भक्ता अवतारवादिनः ॥ १६ ॥

सकलस्य शरीरस्य नासारूपेण संस्थितिः ।
असंभाव्या यथा तद्वत्परिच्छेदोऽखिलात्मनः ॥ २ ॥
सूत्राणि-ऊर्ध्वेष्वधंजरतीयानि देवाः ५-२-१५ । ओषश-
रीरेष्वित्यन्ये ५-२-१६ । पिशाचवदितस्तत इत्यपरे ५-२-१७।
एते तृतीयायां सा भ्रमस्य परा काष्ठा ५-२-१८ ॥

पञ्चमाधिकरणमारचयति-

नाशक्रमाद्विशेषाणां सर्वोच्छेदो भवेन्न वा ।
क्रमशः सर्वनाशे स्यादुच्छेदः का विकल्पना ॥ १ ॥
नाशे विशेषस्यैकस्य परेषां समवस्थितिः ।
उद्भवश्चेत्यसंभाव्या सर्वोच्छेदकथा ततः ॥ २ ॥
सूत्राणि-मणिमयपाञ्चालिकावत्तु सर्वात्मा विम्बः ५-२-१९ ।
मनांसि मणयस्तत्र ५-२-२० । मणिविशेषेषु तत्प्रतिबिम्बा मणि-

पिशाचवत्संविदोऽतस्तनो भुक्तसदृशोयमिति स्थवेतरे ।
चितास्तृतीयामिति वाष्टिमस्थपो भ्रमस्य निःसीमनिष्ठोऽखण्डभ्रमाः ॥१७॥
भ्रमस्य काष्ठा चरमा प्रकीर्तिता सकलानां परमाधिदेवता ।
त्रिकर्मणां या चरमा शुनामियं हतेषु तेषूच्चरमा यमादिषु ॥ १८ ॥
(अ ५) स एव भूमा मणिसालभञ्जिका-निभस्तु विम्बः सकलात्मकः स्थितः ।
मनांसि विश्वङ्मणयोऽत्र विम्बये विशिष्य विम्बग्रहणाय चेश्वते ॥१९॥
मनोविशेषे प्रतिबिम्बितोंऽशतः स एव भूमा ननु जीवसंज्ञकः ।
यथेह यादृग्वपुरिम्बितो मणौ। तथैव बिम्बः प्रतिभाति निश्चितम् ॥२०॥

भेदभिन्ना जीवविशेषाः ५-२-२१ । मणेराकारोपमर्दात्प्रतिबिम्ब-विशेषस्य नाशो न बिम्बस्य न वा कृत्स्नस्य मणिसमूहस्य प्रति-बिम्बसमूहस्य वा ॥ ५-२-२२ ॥

षष्ठाधिकरणमारभ्यते-

भूमांशवेद्योभ्याहत्वा, वेद्यः स्यादेष सर्वथा ।
भक्तानां हि प्रकाशोसाववेद्यो याति सौक्ष्म्यतः ॥ १ ॥
अंशवेद्यः सदा भूमा परिच्छेद्यो न कस्यचित् ।
ज्ञानं यथा यथांशानामविद्यापगमस्तथा ॥ २ ॥

सूत्राणि-तदद्वैतं शुद्धं वैश्वानरीयम् ५-२-२३ । शरीरव-दाकाशवत्समुद्रवच्चेदम् ५-२-२४ । न कार्त्स्न्येन विदितं नात्य-न्तमविदितम् ५-२-२५ । अज्ञातं नराद्याकारत्वादिनां निराकार-

---

मणेरिहैकस्य तु नाप्यये विभुः प्रयाति बिम्बो विलयं कथंचन ।
न चाप्यशेषप्रतिबिम्बविभ्रवो विलीयते तु प्रतिबिम्ब एकशः ॥ २० ॥

( अ० ६ ) तदित्थमायाबलत्वदूषितं विशुद्धमद्वैतमुदारधीर्जगौ ।
अनुस्मरन्नर्जुनसारथेर्गिरः स वल्लभः सत्यवतोसुतानुगः ॥ २२ ॥

यथा कराङ्घ्र्यादि शरीरसंगतं सदित्यभाट्यस्वरसंभृतं यथा ।
तरङ्फेनादि यथाब्धिमाश्रितं तथैव विश्वं सकलात्मनि स्थितम् ॥२३॥
विद्यात्मतत्त्वं त्रिदितं न सर्वथा जगस्य किंचाविदितं न सर्वथा ।
यथा यथास्यांशतयैति मानवस्तथा तथा विज्ञतरत्वमश्नुते ॥ २४ ॥
इत्थंप्रभावोखिलसिद्धयाढ्योखिलात्मनोंशो जडवः सुविप्लुताः ।
दृष्टैकमेकं परिहृत्य कल्पनाः समग्रलाभुः सकलोकरोत्यलम् ॥ २५ ॥

वादिनां च ५-२-२६ । विदितं वामदेवजनकयाज्ञवल्क्यवासुदे-
वादीनां जीवन्मुक्तानाम् ५-२-२७ ॥

सप्तमाधिकरणमारभ्यते-

आत्मानात्मविदोरेका गतिर्वा द्विविधा मता ।
कृमिभस्मविदन्तत्वादेका स्यादुभयोर्गतिः ॥ १ ॥

---

निजास्ललाटादवबोध्यलोकतस्त्रिशारमोङ्कारमुदीर्ण विस्फुरत् ।
नचित्समं ज्योतिरवेक्षसे सखे शरस्य लक्ष्यं प्रणवस्य पण्डितुः ॥ २८ ॥
विलिख्य वा स्वामिपतद्वहोद्गतां पवित्रनालां परिपूर्णसेतमः ।
त्रिलोकपेर्भक्तशिरःसमुद्गतं महः परब्रह्मसमानमद्भुतम् ॥ २७ ॥
रहोनिकुञ्जे यमिनामथ भ्रमन्यविश्य वा तीर्थविहारगह्वरे ।
प्रजापदात्रीर्विधवाजनेष्वपि प्रपश्यसि ब्रह्मपिशाचडेवताः ॥ २८ ॥
अथापि मार्ज्जिष्ठमयं शरीरके मुहुर्मुहुर्वान्तवलक्ष्म निर्मलम् ।
न रामसख्यं न भवत्स्वरूपिणं पुनर्धरायामवतारयिष्यसि ॥ २९ ॥
घनं सखे ते सरयूः प्रदास्यति प्रजानिलाशस्य नवाम्बुमिश्रितम् ।
विपच्छरस्यासुनिरोधरोगिभिः किमङ्ग ते आप्यतडिद्घनादिभिः ॥ ३० ॥
किमङ्ग विज्ञानमिदं निषेवसे विमुञ्च नास्तिक्यमिदं किलाफलम् ।
क्षणश्चिराद्भावनयैव शिक्षये समस्तसिद्धागमगम्यमस्य ते फलम् ॥ ३१ ॥
कथापि वैधेयजनस्तु पोटया भुक्तुंसभयडेन विटैस्तथापरैः ।
इतीव मध्याह्नमयीविमोहितो वञ्चोभिरज्ञानतमःसु मज्जति ॥ ३२ ॥
स एव भूमा सकलात्मकोंशकैरसंप्रभातापतडित्स्वनादिभिः ।
यथाकथञ्चिद्विदितः स्फुरद्धियामनर्घ्यविज्ञानभृतां महात्मनाम् ॥ ३३ ॥

प्रत्यक्षाज्ञाननिरये सद्वानात्मविद: स्थिति: ।
सत्यज्ञानात्मके नाके सदैवात्मविद: स्थिति: ॥ २ ॥
सूचाणि-संनिकृष्टतमं प्रियतमं ज्ञाततममपि तं प्रमादिनो विप्रकृष्टमिवाप्रियमिवाज्ञेयमिवोपेक्षन्ते ५-२-२८ । त आत्महनो असुर्येम्धे तमस्यवतिष्ठन्ते ५-२-२९ । तरति शोकमात्मविद्भयं च प्राप्तोति ५-२-३० । असत: सम्भूत्यामृतं तमसो ज्योति-र्गच्छति ५-२-३१ ॥

इति पञ्चमाध्याये द्वितीयाह्निकम् ॥

---

यदीयतत्त्वग्रहणान्कुटुम्बिनः श्रमेण सिद्धिं जनकादयः पुरा ।
अकर्मसंन्यासपरा ययुः परां परार्ध्यविज्ञानयुता मनीषिणः ॥ ३४ ।
( अ० ७) वदन्त एतं नरवानराकृतिं निराकृतिं वा न विदन्ति तत्त्वतः ।
उपेक्षमाणाश्च समात्मघातिनः पतन्त्यसुर्ये निरये तमोमये ॥ ३५ ॥
विदात्मतत्त्वं त्वखिलात्मकं विदन्विशिष्य नान्विष्यति युक्तधिस्ततो ।
तदंशविज्ञानमुपक्षसप्रभा-सहित्स्वनोऽमाठि स यः परोक्षते ॥ ३६ ॥
तरति शोकमुदस्य भयान्यलं सदसतोऽमतमश्नुत मश्नुतः ।
स भजते तमसश्च परं महो व्रजति मद्भुवमद्भु वसुन्मतिः ॥ ३७ ॥

इति पञ्चमाध्याये द्वितीयाह्निकम् ।

# षष्ठाध्याये प्रथमाह्निकम् ।

षष्ठाध्याये प्रथमाह्निके प्रथमाधिकरणमारभ्यते-

गुणाश्रयोतिरिक्तोस्ति न वा कश्चिद्गुणोत्करात् ।
द्रव्योपलब्धिः प्रत्यक्षा तस्मादस्ति गुणाश्रयः ॥ १ ॥
गुणानामाश्रयः कश्चिन्नातिरिक्तो गुणोत्करात् ।
स्वाश्रयत्वं स्थितं तस्माद्गुणानां वसुधादिवत् ॥ २ ॥

सूत्राणि-न द्रव्यं गुणेभ्यो भिद्यते ६-१-१ । गुणसमुदाये द्रव्यत्वकल्पना सेनावनादिवत् ६-१-२ । आधारो द्रव्यं चेत्तदाधारान्वेषणादनवस्था शेषकूर्मादिवत् ६-१-३ । स्वाधारो गुण समूहस्तु भूम्यादिवत् ॥ ६-१-४ ॥

---

(अ० १) न सर्वविस्मरणसमकुण्ठशक्तिकः पुरापि वा प्रभवति कश्चिदत्र वा ।
प्रमादितो न खलु न सर्वगा स्फुटं विभाव्यते भ्रमप्रदवत्सरादिजा ॥१॥
उदग्रधीस्तर्हि चिरन्तनिष्ठया विशोधयेद्भ्रमनिकरं पुरातनम् ।
श्रमं कृती कृतमिव पूर्वजैर्निजैस्तथोद्यया धनञ्जयबुद्धिसंपदा ॥ २ ॥
न विद्यया कश्चिदपि पूर्णतामियात् पुराऽऽप वेत्यवगमनं सुधिश्चता ।
पुरातना अधुरिह पूर्णविद्यतामिमां मतिं स्फुटमवगच्छ मूर्खताम् ॥३॥
असंगतं किमपि यदेव दृश्यते चिरन्तनेष्वविदितमेवमेव वा ।
विशोधनैरथ परिपूरयेत्तयोर्मुदं परां वहति सुधीरकातरः ॥ ॥ ४ ॥
न पूर्वजाटवरजनः प्रशस्यधीर्भवेद्भुवि न ठित्थशक्तिषु ।
स्तुवन्त्यतूनिति कुमतिस्त्वविद्यया विनाशयत्यनयभरेण बन्धुताम् ॥५॥
प्रमादितां सकलजनस्य शंसता परेण तु प्रमदभरेण नृत्यता ।
युगान्तरे किल विदुषां भविष्यतां कृतेऽखिलं विनिहतधीर्ह्य यज्यते ॥६॥

द्वितीयाधिकरणमारभ्यते-

पृथगर्था इमे द्रव्यगुणांशाः कल्पितास्तु वा ।
पृथगर्था इमे नूनमुपलम्भो हि तादृशः ॥ १ ॥
एकोर्थः शब्दमात्रेण द्रव्यत्वादिविकल्पभूः ।
स्वतन्त्रावस्थितिर्नैषामुपलब्धा पृथक् पृथक् ॥ २ ॥

---

अपश्यतां वितनु समस्तवेदितामतिष्ठतामपि च सुतर्कयोक्तया ।
पदे पदे विखिलपरीक्षणां महान्समुल्लसेत्र हु परमार्थदर्शिनाम् ॥७॥
प्रवर्त्तयन्सरणिमिमां परीक्षया विशोधयन्न च कृतसिद्धसाध्यभाक् ।
नवं नवं प्रणयति शास्त्रमात्मवान्नयात्यसौ विदुषगणनिष्कृतिं कथम् ॥८॥
चिरन्तना निखिलधियोप्यसाधना दधुश्चिराद्पि किल नातिविच्छताम् ।
महाशयां वपुरु महोदयोपि सन्वणिग्जनो ननु कथमल्पभाषकः ॥९॥
चिरन्तनैरुपचितमप्य तु क्रमाद्बहुसुधीर्मंहदिह विप्रसाधनम् ।
निरस्य सद्भ्रमनिकरं परीक्षया महोदयैः प्रथयति शास्त्रपद्धतीः ॥१०॥
न भिद्यते गुणनिकराद्गुणी स्फुटं निरामयो गुणनिकरो व्यवस्थितः ।
असंगता गुणगुणिभावकल्पनास्तिरस्यते गुणनिकराद्गुणीति कः ॥११॥
न भिद्यते वनमवनीरुहां यथाटवीकिनो न च ननु सैनिकोत्करात् ।
न भिद्यते गुणनिकरात्तथा गुणी गुणाश्रयो वपुरिति कल्पमात्रजः ॥१२॥
गुणाश्रयो यदि परिकल्प्यतेथवा महाश्रयः पुनरपि किं न कल्प्यते ।
अथाश्रयः स किल निरामयस्तदा गुणोत्करो न कथमनाश्रयस्तथ ॥१३॥
गुणक्रियाश्रयपरिकल्पना चितेरिवोरगपदनिगतस्वतर्कणा ।
यथा पुनर्धरणिरियं निराश्रया तथा स्फुटं गुणनिकरो निराश्रयः ॥१४॥

सूत्राणि–कर्मगुणविशेषः ६-१-५ । सामान्यं नाममात्र मतिरिक्तं विशेषेभ्यः ६-१-६ । एतेन विशेषः प्रयुक्तः ६-१-७ । अयुतसिद्धयोरभेदात्समवायोपि तथा ६-१-८ ॥

तृतीयाधिकरणमारभ्यते–

अभावः कश्चिदर्थोस्ति नार्थोयमथवा पृथक् ।
व्यपदेशाद्घटो नास्तीत्यादेरर्थोस्त्यसौ पृथक् ॥ १ ॥
प्रतियोगिस्वरूपत्वान्नाभावोर्थः पृथङ्मतः ।
तद्भिन्न सर्वमस्तीति तद्भावार्थ ईरितः ॥ २ ॥

---

(अ० २) गुणः क्रियेत्यनतिशयाभिधा मया द्वयं यतः परिणतिरेव नेतरत् ।
कुतार्किका निजगदुरर्थमद्वयं गुणक्रियाधिकरणजातिनामभिः ॥ १५ ॥
दृढान्विता बहुषु न जातिरेककी गुणान्समान्कलयति जातिरित्यलम् ।
समापि सा न हि शिशुना शिशुद्वये पयोम्बुनोर्न मधुरिमा स एव वा ॥१६॥
न जातिरस्त्यनिशयिनी विशेषतो न वा विशेष इह स तां अपेक्षते ।
प्रकल्प्य तां सदनु विशेषवाहिनो विडम्बनां कणभुगनुश्रिता ययुः ॥१७॥
कुतार्किकैः पृथगिति शब्दमात्रतो गुणक्रियाधिकरणजातिनामभिः ।
उदीरितेप्यतुलमभिन्नयाद्वये न वास्तवी भवति भिदेदृशी यतः ॥१८॥
अतः कथं गुणगुणिकारकक्रियाविशेषकः किल समवाय इष्यताम् ।
अपेक्ष्यतेस्य स नतु बोधकं परं प्रपञ्चसे कथमिति बादरायणः ॥ १९ ॥
(अ०३) विशेषश्च हि सकलात्मना यतो न सत्तया किल सकलात्मना स्फुटम् ।
असत्त्वमित्यपरमिदं न भेदतोतिरिच्यते विषयद्वयादयं न च ॥ २० ॥
विरञ्चनः कणभुगपि स्वशब्दतो न सप्तमं सुमतिरिहार्थमुक्तवान् ।
असच्च वा न च सदिदं यदद्वयं विकल्पवत्खलिति भवात्मकं च तत् ॥२१॥

सूत्राणि-अभावो भेदः स प्रतियोगिस्वरूपः ६-१-९ । अत्यन्ताभावार्थं तार्किककल्पना ६-१-१० । अतएव कणभुजोऽप्यभावाभावः ६-१-११ ॥

चतुर्थाधिकरणमारभ्यते-

तत्त्वानां पञ्चसंख्यत्वं प्रत्येकं संगतं न वा ।
रूपादिगुणयोगेन पञ्चसंख्यैव संगता ॥ १ ॥
घटितत्वाज्जलादीनां पञ्चसंख्या त्वसंगता ।
आग्नेयादीनि तत्त्वानि वियद्वा तत्त्वमेककम् ॥ २ ॥

सूत्रे-पृथिव्यादीन्यतत्त्वानि तत्त्वान्तरघटितत्वात् ६-१-१२ नाकाशः शब्दगुणो निर्वायौ तदभावात् ६-१-१३ ॥

पञ्चमाधिकरणमारभ्यते-

दिक्कालयोरिहार्थत्व पृथगस्ति न वा पुनः ।
परत्वादिधियां हेतू स्यातामर्थाविमौ पृथक् ॥ १ ॥

---

(प.४) क्षितिर्जलं शुचिरनिलस्तथा वियत्त्रितयमकारणेन विदुरिति तत्त्वपञ्चकम् ।
शुचिगुणो वियति विवर्त्ततेखिलं त्रयं परं घटितमनेकतत्त्वकम् ॥ २२ ॥
नहिन्मयं वियदिति तत्त्वमेककं विवर्त्तते स्वयमिह सत्तदात्मना ।
विवर्त्तने यदवयवैर्घटितं विभाव्यते वदन्ति तत्त्वमिति बुधास्तदेव तु ॥ २३ ॥
जवायुके वियति न यत्नयोगतः स्वनः समुद्भवति ततो न संगता ।
स्वनस्य सा वियदवलम्बकल्पना स्वनः स्फुटं भवदवलम्ब इष्यते ॥ २४ ॥
अभीक्ष्णनोभिघनिलाभ्यनः परादवग्रहादिकात्स्वतनुर्यैति न स्वनः ।
प्रभां वियत्तरलतरङ्गरिङ्खणां स्वनं पुनर्विदुरनिलोर्म्यिकात्मकम् ॥ २५ ॥

सामान्यवन्नूम्येकस्मिन्कल्पना द्विगनेहसोः ।
अतो न पृथगर्थत्वं तयोरिह समञ्जसम् ॥ २ ॥

सूत्रम्–दिक्कालौ सामान्यवत् ६-१-१४ ॥

षष्ठाधिकरणमारचयति—

लयसृष्ट्यादयेऽदृष्टं स्वीकर्त्तव्यमथो न वा ।
अज्ञातहेतुकार्यार्थं कर्त्तव्याऽदृष्टकल्पना ॥ १ ॥
सृष्टेरनाद्यनन्तत्वाज्जीवस्यापुनरुद्भवात् ।
अदृष्टकल्पना व्यर्था सर्वं दृश्यात्प्रसिध्यति ॥ २ ॥

सूत्रम्–नादृष्टं व्याघातात् ६-१-१५ ॥

सप्तमाधिकरणमारचयति—

एक आत्माथवानेके परजीवादिनामकाः ।
आत्मानो बहवो दृष्टास्तस्मान्नैक्यमिहात्मनः ॥ १ ॥

---

(अ. ५) न जातिरत्यधिकरणात्तथा पृथग्द्विगस्तथा न पृथगनेहसा समम् ।
दृशाद्युपेधिकरणभूमि कल्पना गुणादिवत्स्किञ्च दिगनेहसोरपि ॥ २६ ॥

( अ. ६ ) अदृष्टमित्युदितमपूर्वमेव वा पुरातनं सुकृतमथापि दुष्कृतम् ।
तदुद्भवा फलजननी च सैद्धिकयाथवा स्फुटं मतमसमञ्जसं तु तत् ॥२७॥

न चाप्यणो भवति मनोऽवयवत्वाखिलस्य यज्जगत दृष्टेकदा यतः ।
अतोभवद्यथगणवो न आनुषिच सिध्यिना स्वयमथवापि योजिताः॥२८॥

असंगता प्रभवकथाखिलात्मनो न चापरं अनुरपि सिध्यति स्फुटम् ।
निरर्थया सदसददृष्टवार्तया सपात्यरं जगदुदयाय याचिता ॥ २९ ॥

जीवा बुद्बुदवत्तस्मात्तस्मादात्मैक एव तु ।
दीर्घतादि घने यद्वत्तद्वदेवा इह स्थिताः ॥ २ ॥

सूत्रे-आत्मैको जीवस्य शरीरायुत्पत्तिसिद्धत्वात् ६-१-१६ ।

तस्मिन्द्रव्यत्वादि घन इवास्तित्वादि ६-१-१७ ॥

अष्टमाधिकरणमारभ्यते—

मनस्तनोः पृथङ्नो वा पृथगस्त्येव तार्किकैः ।
अणु द्रव्यं हि तत्स्पष्टं प्रतिपन्नं मनीषिभिः ॥ १ ॥
पृथङ्मस्तित्वकनाड्यादेर्मनो नास्तीह किञ्चन ।
मनस्तन्वादितर्को हि प्रकृतिप्रत्ययादिवत् ॥ २ ॥

सूत्रम्-मनो जीववत् ६-१-१८ ॥

नवमाधिकरणमारभ्यते—

अप्रत्यक्षे विषक्तत्वेनुभिर्जगद्विदं न वा ।
साक्षैरणुभिः सर्वमप्रत्यक्षेश्वरे भवेत् ॥ १ ॥

---

(अ. ७) सनातनो विभुरखिलात्मकः सदा विचित्रतां दधदयमेक आत्मनि ।
कस्मान्नित्यात्मनुमनु नाणजन्मिनो न ज्ञायन्ताः स्वयमथ जीवबुद्बुदाः ॥ २ ॥
कस्माद्धेये घन इव सत्त्वदीर्घता गभीरतादिकमखिलं विलोक्यते ।
गुणक्रियाधिकरणजातिवादिनां विशेष इत्यवधिरात्मवेदिनः ॥ ३ ॥
(अ. ८) यथा मनोः पृथगिह जीव इत्ययं न कश्चनैवमपि मनो न वा पृथक्
मनूमिमां व्यपदिदिशुः कुतार्किका विचक्षुषो द्विपमिव तत्सदात्मना ॥ ४ ॥
(अ. ९) नवाणवो विषमि तरन्ति उच्चटा अदृष्टतो दधत इवसतो मतिम्
विजृम्भितं प्रलयमथ क्रमात्तनः प्रपुष्यते द्व्यणुकमुखं मनश्चलात् ॥ ५ ॥
न संभवत्यणुनिकरे अदे न वा न चात्मनि स्फुटमसतो लयोदये ।
अदृष्टमित्यहृदयकल्पनां सुधावलम्बतेऽमरतरमेव तार्किकः ॥ ६ ॥

प्रत्यक्षतास्ति नभसो गवाक्षं समञ्जसम् ।
नाप्रत्यक्षेश्वरे तस्मादणवो विश्वहेतवः ॥ २ ॥

सूत्राणि-नाणवः कार्यमुजाः ६-१ १६ ।
त आकाश उपलभ्यमाने मत्स्या इव वारिणि ६-१-२० । न
शून्यमन्तरे वियतो वस्तुत्वात् ६-१-२१ ॥

ठ्यमाधिकरणमारभ्यते—

शरीरपञ्जरस्थोसौ ज्ञाता भवति वा न वा ।
शरीरपञ्जरस्थः स्याद्बाह्यस्य ज्ञानमावहन् ॥ १ ॥
आत्मन्येव शरीरादि सर्वमेष प्रपश्यति ।
— अबाह्योनन्तरस्तस्मात्कृत्स्नो रसघनो मतः ॥ २ ॥

प्रभामये विपति भ्रमाद्बाम्भसि स्फुरन्तंडित्पुष दृष्टाणवः परैः ।
प्रकल्पिताः प्रकृतिविदां वरैः परं किमर्थाश्चिरं हृदि वधतु स्थितिं विदाम् ॥३५॥
यद्वा तथा स्थितिमणवो वधस्वमी वहन्ति ते न तु ननु शून्यमन्तरे ।
तदन्तरे विपदिति वस्तु दृश्यते यदात्मकं सकलमुशन्ति केवल ॥ ३६ ॥
( क्र० १० ) सह स्थितिर्वत उपलभ्यतेनयोस्तनो भिदा न भवति विन्नियस्तुनोः ।
यद्वोभयप्रतिनियतोभयस्थितिस्तद्वोभयोर्भवति भिदा न वस्तुनः ॥ ३७ ॥
चिदात्मनि स्फुरति सतस्तु शाश्वतेऽखिलात्मके ननु विषयेन्द्रियादिकम् ।
न तस्थितिर्भवति चिदात्मनः पृथक् सतस्ततः पृथगथवा चिदात्मनः ॥३८॥
चिदात्मके महितमयप्रभाप्रभाजिका-समे मनोमणिमुकुरेषु वस्तुनः ।
कथेयमे प्रतिफलनं द्वयोर्द्वयोः समागमे ऽभवति संनिवर्तनः ॥ ३९ ॥
चिदंशयोर्यदि तु न संनिकृष्टता तदा भवेत्प्रतिफलनं कथं तयोः ।
ततोंशयोर्भवति न विप्रकृष्टयोश्चिदात्मनः स्फुटमितरेतरग्रहः ॥ ४० ॥

सूत्राणि—उभयव्यावृत्तेरभेदपर्यवसायित्वादुपलम्भोपलब्ध-योरभेदः ६-१-२२ । सर्वात्मनः स्वात्मनि विषयेन्द्रियसंनिकर्षोपलम्भः ६-१-२३ । मनोमुकुरेषु तदुपलम्भेषु संनिकृष्टोपलब्धान्तरप्रतिफलनम् ६-१-२४ । संनिकर्षविशेषाभावाद्ग्रहणान्तराग्रहः ६-१-२५ । तस्मादिन्द्रियेण द्रव्यादेरुपलम्भोऽनुपलब्धपूर्वस्य ६-१-२६ ॥

एकाठ्याधिकरणमारचयति—

कार्यकारणभावाद्वा स्वभावाद्वानुमा न वा ।
भवेत्तयोरेकतरात्सर्वत्रैवं हि दृश्यते ॥ १ ॥
कार्यकारणयोरन्यत्वात्संगतं न तत् ।
उक्तं त्ववयविज्ञानमनुमायाः प्रयोजकम् ॥ २ ॥

न वस्तुनः पृथग्भूता स्थितिश्चित्रस्वात्मनोऽखिलमुपलब्धिरात्मनि ।
न तस्य तत्तनुमयपञ्जरस्थितेर्मर्जेन्द्रियैर्बहिरिह वस्तुनो ग्रहः ॥ ४१ ॥
(अ० ९१) न केवलादिह सहचारतोऽनुमा न च कृतेः परमपरानुमापकम् ।
धूमागमेऽग्निगमवतोदुकस्य वा धूमानुमा न च नवतोदुकाभतः ॥ ४२ ॥
चित्रस्य तस्किल कतिचिच्चिरन्तनाः प्रपेदिरे प्रतिनियतां स्थितिं गुणैः ।
स्वभावतः क्वचिदथ कार्यकारण-प्रकर्षतः क्वचिदनुमार्थमिष्यते ॥ ४३ ॥
न क्षिप्यते त्यजति तदस्वभावतामसन्नरोधंवहति मुक्तात्मकाश्रिति ।
चिरन्तनो वदति समञ्जसं न तच्च जातिरस्त्यतिशयिनी विशेषतः ॥ ४४ ॥
अवस्थितिर्घटकवयस्य या परा वदन्ति तां कतिचन कारणाश्रयाः ।
अमुष्य या स्थितिरिह कार्यकल्पतः परे विदुः पुनरिदमेव कारणम् ॥ ४५ ॥

सूत्राणि—नानुमानं सहचारात् ६-१-२७ । कार्यकारण-भावात्स्वभावाद्वा ६-१-२८ । स्वभावो नाममात्रम् ६-१-२९ । कारणमंशावस्थानविशेषः ६-१-३० । कारणकारणत्वादन्य-थासिद्धमन्यत् ६-१-३१ । तस्मादुपादानमात्रम् ६-१-३२ । तदनन्यत्वमौपनिषदं बादरायणः ६-१-३३ । नाविर्भावतिरोभावौ योगवियोगौ तु सन्निवेशान्तरे ६-१-३४ । कार्यपरीक्षया कारण-निर्णयश्चेदसंनिकृष्टावयवानुमानम् ६-१-३५ । अवयविन उप-लब्धिरिति चेन्न तस्यावयवसमूहानतिरेकात् ६-१-३६ ॥

कार्येऽस्यते किमपि न कार्यसिद्धये परं यतस्तठित्थ मुधा त्रिधा विदुः ।
निमित्तमप्यथ समवायि कारणं कुतार्किकास्तदसमवायि चापरम् ॥४६॥
यदेककं किल समवायिकारणं तदिष्यतां ध्रुवमिह कार्यसिद्धये ।
द्वितात्मिकां प्रकृतिमिमां निमित्तमित्यपि स्फुटं प्रवदति बादरायणः ॥४७॥
न कार्यतोऽपि च विभिन्नमिष्यते कारणं त्रिरस्तयोर्न्यविवर प्रकृतां स्फुटाम् ।
न कार्यलक्षात इह कारणानुमा गवेष्यतामितरतस्तथानुमाश्रयः ॥ ४८ ॥
इहान्यथा भवति च संनिवेशने विशेषजनं घटमठयोरभयं तु वा ।
तिरोऽन्विर्भे भवति नाप्यथोद्भवो नवस्य कस्यचिदितरस्य वस्तुनः ॥४९॥
न कार्यतस्तत इह कारणानुमा यतोऽन्वयः सविधगतास्यरस्य सा ।
शुचेः स्फुटं भवति कणांश एकको यमंशतोऽनुमिमत एव धूमतः ॥ ५० ॥
कुतार्किका अवयविनो नवस्य यद्ग्रहं विदुः स्फुटमसमञ्जसं तु तत् ।
विभिद्यतेऽवयवसमूहतो यतो न किंचिदप्यवयविनामभाजनम् ॥ ५१ ॥

द्वादशाधिकरणमारभ्यते—

दिव्यास्ति शक्तिर्योग्यादेर्न वास्तवेव यतस्त्वमी
अप्रत्यक्षानुमायोग्यं जानन्ति स्म महौजसः ॥ १ ॥
न प्रत्यक्षानुपायोग्या सा शक्तिर्नास्यतः स्फुटम् ।
मूढा गुणातिक्रमाद्यैरेताः कुर्वन्ति कल्पनाः ॥ २ ॥

सूत्रे-न योगिप्रत्यक्षमन्याहशम् ६-१-३७ । विशेषा-त्प्रेक्षागुणवि लक्षुनमध्यमविपर्यासाद्याहेत्वाभासप्रयोजकाबाध्याः ६-१-३८ ॥

इति षष्ठाध्याये प्रथमाह्निकम् ॥

---

(अ० १२) न योगिभाजमपि मनु दिव्यशक्तिताविधानद्यानपि अस्ति एतत्सोगतम् ।
पुरः स्थितं स्वनिश्चित्रं निरीक्षते यमाद्यथाक्षनु पुरोपि पश्यति ॥ ५२॥
अमंगले स्फुटमपि दिव्यशक्तिभिर्विभाव्यते निखिलमनन्ययोगतः ।
कृतार्तृयं विंशदविष्वक्कल्पना हृदाभये दधति न पारमार्थिकाः ॥ ५३ ॥

विशेषस्योत्प्रेक्षा स्थानिमनि तु सामान्यविधया
गुणं व्यतिक्रम्यानुमितिरथ मध्यानवधृतिः ।
क्रमे तर्काभासाः स्फुटमनुदिताः पञ्चकविभि-
र्मुनुक्षिवर्गं लोके विदधति धियां विभ्रमसमम् ॥ ५४ ॥

अतः स्वर्वारस्त्रीसुरतरसविशेषादि कलयं-
श्चिरज्ञानां दिव्यां करणपटुतां यद्भवदृशम् ॥
शिशुर्मुग्धो दग्धैरभिगठविकालव्रतवकैः
वृतार्थंरात्मानं व्यसनमनुधावत्यविदितम् ॥ ५५ ॥

इति षष्ठाध्याये प्रथमाह्निकम् ।

# षष्ठाध्याये द्वितीयाह्निकम् ।

षष्ठाध्याये द्वितीयाह्निके प्रथमाधिकरणमारभ्यते—

प्रामाण्यमाप्तवचसामर्थवादेस्ति वा न वा ।

ऋष्यादयो हि सर्वज्ञाः श्रद्धेयवचसः सदा ॥ १ ॥

धर्मज्ञा ऋषयः प्राञ्चः सर्वज्ञो नास्ति कश्चन ।

अव्याहते विधावेव तस्माद्वाप्तोनुगम्यते ॥ २ ॥

सूत्राणि-शब्दो नार्थवादे न वा व्याहते विधौ ६-२-१ । तस्माद्व्याहते विधाविति नियमो वाच्यः ६-२-२ । तद्वचनं दोषोक्षचरणादीनाम् ६-२-३ । पूर्वजाः साक्षात्कृतधर्माणो न सर्वज्ञाः ६-२-४ ॥

---

१. १ ) विधिषु केवलमाप्तगिरः प्रमा यदि विधेर्विषयः सुसमञ्जसः ।

न पुनरर्थवचस्त्वपरीक्षया भवति सत्यमसत्यमथापि वा ॥ १ ॥

हुतमिह त्रिगुणं खलु यद्दमं द्विगुणमेत्य चतुःसमता मता ।

इति न वस्तुदिनिश्चितये जनः परमते रमते ऋजुकोपि सन् ॥ २ ॥

नियतमाप्तगिरामनुपालनं विधिषये विदधीत समञ्जसे ।

अनियमोक्षपदाप्तविवेकतो विनियमस्त्वयमस्त्वनयर्द्धुवाम् ॥ ३ ॥

विहितधर्मफला ऋषयोभवन्विति यदः स्मर यास्कमुनेः सखे ।

जगति सर्वविदः पुरुषाः परं जिनमते न मते मुनिसेविनाम् ॥ ४ ॥

न पुनरल्पविदोपि पितुर्विधौ न गणयन्ति सुताः पितृवत्सलाः ।

गतभयोपि हि वस्तुपरीक्षणे विनयते न पदोत्क्रममप्यसौ ॥ ५ ॥

तृतीयाधिकरणमारभते—

प्रमाणं त्रितयाद्व्यतिरिक्तं संभवेन्न वा ।
ऐतिह्यादेः प्रमाणत्वात्संभवेदेव सर्वथा ॥ १ ॥
केषांचिदन्तर्भावोऽत्र त्रयेऽन्येषाममानता ।
त्रयमेव प्रमाणं तद्व्यतिरिक्तं न संभवेत् ॥ २ ॥
सूत्रे-त्रितयातिरिक्तोत्प्रेक्षा पुनरुक्तिर्व्याहतिर्वा ६-२-५ ।
विस्तरेण निरस्तान्यैः ६-२-६ ॥

तृतीयाधिकरणमारभते—

साम्यवैषम्यरूपे स्तो लयसृष्टी न वा पुमः ।
कापिलानामिव स्यातां सर्वस्यैते समञ्जसे ॥ १ ॥
अव्ययो ह्ययमश्वत्थो न सर्वस्य भवाप्ययौ ।
एकस्य नाशे सन्त्यन्ये क्रमनाशादिशालिनः ॥ २ ॥

(अ॰ २) अनुपलब्धिजनधृतिसंमितं यदपि मानमुशन्ति थिरमनाः ।
त्रितयतोऽभ्यधिकं विनिरस्यतां थिरमयं रमयन्भ्रम एव वः ॥ ६ ॥

(अ॰ ३) प्रकृतिरस्ति सदा पुरुषोऽपि चेत्क्षयमयौ क्षपिलस्य भवाप्ययौ ।
न गुणसाम्यनिमित्तमवैयते प्रकृतिरस्तुतिरस्तु कथं नु सा ॥ ७ ॥
भवति वाप्य दृशाम्नुवयाऽथवा भवति वाप्यवयोऽपि तथाम्नुभः ।
प्रकृतिसा कतरस्य तदस्त्वतः क्षपिलवेवलवेदगमिष्यति ॥ ८ ॥
न भविता भवितापविमोक्षणं युगपदङ्ग पदं गहनं हि तत् ।
अहमता समतान्यनिशं गुणैः सकलया कलया न भवाप्ययौ ॥ ९ ॥

सूत्राणि–न साम्यावस्था हेत्वभावात् ६–२–७ । अव्यक्ता-
दव्यक्तं कपिलस्येति चेद्विपर्ययेपि वारिवाप्यवत् ६–२–८ । न
सृष्टिर्नाप्ययः सर्वस्य ६–२–९ । सृष्टेरयौगपद्यादेकाप्ययेप्यन्याव-
स्थानात् ६–२–१० । अव्ययोश्वत्थ इति वासुदेवः ६–२–११ ॥

चतुर्थाधिकरणमारचयति—

संशयादिग्रहः साधुराहंतानां न वा पुनः ।
सर्वं तीर्थकरैरुक्तं सर्वज्ञैः स्यात्समञ्जसम् ॥ १ ॥
सर्वज्ञत्वं न कस्यापि संशयादिग्रहस्ततः ।
निरुद्धो युक्तिभिर्हन्त नाङ्गीकार्यः कथञ्चन ॥ २ ॥

सूत्रम् – संशयसर्वज्ञतालोकाकाशादि व्याहतमार्हता
नाम् ६–२–१२ ॥

पञ्चमाधिकरणमारचयति—

कारुण्यपरमा युक्ता सौगती कल्पना न वा ।
सर्वत्यागपरा युक्ता कल्पनासौ भवेद्ध्रुवम् ॥ १ ॥

---

जगदिदं चलपंचमतोऽव्ययं वदति सोपि धनञ्जयसारथिः ।
निखिलसृष्टिलयं वदतः सतामरुचिरे रुचिरेतु कथं मते ॥ १० ॥
(अ. ४) सकलसंशयवाटमुपागतो जिनकुलस्य तथा सकलज्ञताम् ।
क्षमिषु दा मनुजेष्विव चार्हतः कृतदयस्तदयं समुपेक्ष्यताम् ॥ ११ ॥
(अ. ५) क्षणिकतामखिलस्य च दुःखतामपि विदन्सकलस्य च शून्यताम् ।
अपिदधे सुगतानुगतस्तनुं करुणयाकलया किल कन्यया ॥ १२ ॥
सकलशून्यकथोपि पुनर्जनिं गिरवमाकसुरासुरकल्पनाम् ।
